# Shri Gitagangeyam SubrahmaNya Ashtapadi with Notes

# श्रीगीतगाङ्गेयम् सुब्रह्मण्याष्टपदी सटीक

## Document Information

Text title : Gita Gangeyam or Subrahmanya Ashtapadi with Notes

File name : gItagAngeyamsaTIka.itx

Category : subrahmanya, aShTaka, kRitI

Location : doc_subrahmanya

Author : Vishwanatha Sastry, (kAnADukAttAn) Kanaadukattan, Tamil Nadu

Transliterated by : Rajani Arjun Shankar rajani_arjun at yahoo.com

Proofread by : Rajani Arjun Shankar rajani_arjun at yahoo.com

Description/comments : See mUlam for only the text

Acknowledge-Permission: Murugan Thiruvarul Sangam, Pranatharthihara Naamasankeerthana Mandali, P. Venkataraman, Bangalore

Latest update : June 22, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 9, 2023

*sanskritdocuments.org*

# श्रीगीतगाङ्गेयम् सुब्रह्मण्याष्टपदी सटीक

Introduction

The Geeta-Gangeyam is a work, modeled on the Geeta-govindam of Jayadeva, but with plenty of charm and merit of its own. Its author is Kanadukathan Sri Vishwanatha Kavi, who describes himself as a Shabdika (grammarian) and the son of Srimati Balamba and Sri Ramasubrahmanya, hailing from Shivapuram Agrahara of Pudukkottai, and residing in Kanadukathan. (Additional information on the author is given at the end.)

The hero or Nayaka of this work is Sri Subrahmanya (who is known as Gangeya too, being the son of Ganga), enshrined in the temple atop the hill at Kunrakkudi in Tamil Nadu. This hill is known as Mayuragiri. The heroine or Nayika is Sri Valli, the younger consort of Subrahmanya.

The work was printed (in Tamil Script) by Murugan Tiruvarut Sangam (Tiruvallikeni, Chennai) in 1983, edited by Sri T.S.Vasudevan. It was also part of the Hari Hara Guha Sampradaya Bhajanamrutam, (in Tamil Script), brought out by Sri A.K. Gopalan Bhagavatar. The fifth edition of this book came out in 1996. In the year 2008, the Pranatartihara Namasankirthana Mandali of Bengaluru, brought out the book (in Devanagari Script). Dr Siva of Hyderabad has also published this (in Tamil script.) This document uses all of these four sources as references.

## अष्टपदी - १

श्लोकाः -

कस्त्वं ब्रूहि ? दयस्व मे अतिपलितः ! कस्ते पिता ? कामजित् !
सम्प्राप्तोऽसि कुतः ? अचलात् ! किमु फलं मुख्यं ? प्रियालोकनम् !
“तन्मे अद्य एहि सहायतां दुहितुः ” इत्युक्त्वा पुलिन्दे गते

वल्ली-षण्मुखयोः भवन्तु भवतां भद्रप्रदाः केलयः ॥ श्लो. १॥

(शार्दूल-विक्रीडितम् - Shardula-vikriditam Metre : 19 Syllables per quarter)
(First two lines are a dialogue between Nambirajan (Valli′s father) and Subrahmanya in the guise of an old man, the third is Nambirajan asking the old man to be a companion and mentor to his daughter Valli, and the fourth a benediction.)

श्रीमन्-मयूर-भूधर-शिखर आभरणस्य भगवतः कृपया !
श्री-सुब्रह्मण्यस्य प्रचोदितो अयं जनः प्रयतते अत्र हि ॥ श्लो. २॥

(आर्या - Arya Metre : 12 + 18 Matras in each line)
(मयूर-भूधर = Kunrakkudi Hill)

सौपर्वणीं इह गिरं सफलां विधातुं
वाञ्छन् विचित्र-सरसां कवितां च लब्धुम् ।
श्री-विश्वनाथ-कविः आतनुते अद्य हृद्यं
श्रीमत्-कुमार-चरितामृत-वर्षि काव्यम् ॥ श्लो. ३॥

(वसन्ततिलक - Metre : Vasantatilaka - 14 Syllables per quarter)
(सौपर्वणी - praiseworthy. Here, the poet explains his motive in composing this work)

जहतु काल-भयं रसिका जनाः
दधतु काव्यं इदं हृदि वाचि च ।
ददतु शम्भु-सुते निज-चेतसः
चरितुं अन्तर-माश्रित-वत्सले ॥ श्लो. ४॥

(द्रुत-विलम्बित Metre : Drutavilambita - 12 Syllables per quarter)
(The poet wishes that Rasikas will read his work and offer their hearts to the Lord)

लक्ष्मीं पक्ष्मलयति उदार-ललितां व्याकोचयति अन्वहम्
वाचं माक्षिक-चातुरी-परजुषं पुष्णाति पुण्यं यशः ।
आधत्ते भजतां अरोग-तनुतां अन्यादृशं वैभवं
दत्ते दारुण-मोह-वारण-चणं बोधं नृणां षण्मुखः ॥ श्लो. ५॥

(शार्दूल-विक्रीडितम् - Shardula-vikriditam Metre : 19 Syllables per quarter)
(This verse describes the benefits given by Lord Subrahmanya to devotees. अन्यादृश - uncommon)

अष्टपदी - १ Malava Raga, Adi Tala

(This song describes the sequence of events in Subrahmanya's Avatara)

अमर-नदी-सलिले, (प्रभो कुमार) रवि-कोटि-समानम् ।
पनित-महामुनि-कृत-बहुमानम् । षण्मुख धृत-तैजस-रूप ॥

जय शिखिशैल-पते ॥ १॥

हिम-गिरि-तट-निकटे, (प्रभो कुमार) शर-कानन-निष्ठे ।
तदनु विराजित-जलज-वरिष्ठे । षण्मुख श्रित-दैवत-जाल ॥

जय शिखिशैल-पते ॥ २॥

विबुध-जन-समुदये, (प्रभो कुमार) परिवारक-भावम् ।
गतवति योजित-शावक-भावम् । षण्मुख रुचि-भर रमणीय ॥

जय शिखिशैल-पते ॥ ३॥

हरि-वचसा उपगते, (प्रभो कुमार) बहुला-समुदाये ।
"तु इमं अनुजागृहि हित-स्तुत-पेये" । षण्मुख शिशु-षड्कल-दीप्त ॥

जय शिखिशैल-पते ॥ ४॥

वृषभ-गते गिरिशे, (प्रभो कुमार) स्व-विलोकन-कामे ।
समुपगते मुदमापित-सोमे । षण्मुख गिरिजा-कलितैक्य ॥

जय शिखिशैल-पते ॥ ५॥

पयसि वदन-गलिते, (प्रभो कुमार) जननी-सुवितीर्णे ।
मुनि-तनयान्वित-सरसि सुपूर्णे । षण्मुख श्रित-शैल-सुताङ्क ॥

जय शिखिशैल-पते ॥ ६॥

त्वयि चलति सपितृके, (प्रभो कुमार) रजताचल-शृङ्गे ।
विविध-विलास-क्रतु-वसित-तुङ्गे। षण्मुख सुर-भय-हर-लील ॥

जय शिखिशैल-पते ॥ ७॥

ससुहृद् अखिल-भुवने, (प्रभो कुमार) कृतवान् असि लीलाम् ।
इतर-सुदुर्लभ-विभव-विशालाम् । षण्मुख बहु-विक्रम-शील ॥

जय शिखिशैल-पते ॥ ८॥

स्वीकुरु ललित-पदं, (प्रभो कुमार) स्तवं अति-रस-भरितम् ।

विश्वनाथ-कविना कृतं एतम् । षण्मुख नव-वीर-समेत ॥

जय शिखिशैल-पते ॥ ९॥

(अमर-नदी - River Ganga, शिखिशैल - Kunrakkudi, पनित - praised , बहुला-समुदाय - Krittika goddesses, गिरिजा-कलितैक्य - made into one child by Parvati, मुनितनय - the six sons of Parashara, cursed to become fish, restored by drinking the ucchishta-prasada of Subrahmanya, रजताचल - Kailasa)

# अष्टपदी - २

श्लोकौ -

गङ्गां तुङ्गयते, मुदा शरवणं शर्म-प्रदं तन्वते
देवान् मोदयते, पयोद-बहुला-मातृः निजाः कुर्वते ।
शापान्मोचयते पराशर-सुतान् आतन्वते सम्मतं
पित्रा, सर्व-जगत्तले कलयते लीलां नमस्ते विभो ॥ श्लो. ६ ॥

(शार्दूल-विक्रीडितम् - Shardula-vikriditam Metre : 19 Syllables per quarter)
(This describes the greatness of Subrahmanya's Avatara, which gave glory to Ganga and Sharavana, pleased Devas, accepted Krittikas as mothers, released the sons of Parashara from their curse and made them accepted by their father, and performed many such Leelas)

मुक्तान् उद्धरते, शुचं शमयते, सौलभ्यं आबिभ्रते
विद्यां वेदयते गुणान् घटयते शक्ति-क्षये बिभ्रते ।
पापं लोपयते, कलिं लघयते, नीरोगतां तन्वते
वीरान् पालयते, दयां कलयते, वल्लीश तुभ्यं नमः ॥ श्लो. ७॥

(शार्दूल-विक्रीडितम् - Shardula-vikriditam Metre : 19 Syllables per quarter)
(Salutations to the Lord of Valli, who uplifts liberated souls, removes sorrow, is easily accessible, gives wisdom and virtues, supports during weakness, removes sins, lightens the evils of Kaliyuga, gives freedom from diseases, protects brave ones and shows mercy)

अष्टपदी - २ Bhairavi Raga, Triputa Tala

रजत-शिलोच्चय-भूषण । भव-भीषण ।
विदलित-कनक-महीध्र ॥ जय जय देव गुह ॥ १॥

मुनि-मख-जनुरज-शासन । भय-नाशन ।
श्रित-सुर-बल-पति-भाव ॥ जय जय देव गुह ॥ २॥

निगडित-मत्त-विरिञ्चन । बुध-रञ्जन ।
प्रणव-पदार्थ पुराण ॥ जय जय देव गुह ॥ ३॥

निज-वपुषा पितृ-मोहन । शिखि-वाहन ।
नवमणि-मय-गल-हार ॥ जय जय देव गुह ॥ ४॥

क्रौञ्च-महीधर-भेदन । शुभ-साधन ॥

विनिहत-तारक-दैत्य ॥ जय जय देव गुह ॥ ५॥

सिंह-मुखासुर-खण्डन । कलि-दण्डन ।
रण-हत-सुर-रिपु-शूर ॥ जय जय देव गुह ॥ ६॥

सुरपति-तनुजा-वल्लभ । रिपु-दुर्लभ ।
कृत-परशिखरि-विलास ॥ जय जय देव गुह ॥ ७॥

शुभं इह मे प्रतिपादय । सकृपोदय ।
तव पदकमल-नताय ॥ जय जय देव गुह ॥ ८॥

विश्वनाथ-कवि-भाषितम् । गुण-भूषितम् ।
शृणु वर-मङ्गल-गीतम् ॥ जय जय देव गुह ॥ ९॥

(कनक-महीध्र - Golden mountain Meru, मुनि-मख-जनुरज - the goat that emerged from Narada′s Yaga, सुर-बल - Army of Devas, निगडित - chained, परशिखरि - Tirupparankundram)

श्लोकः -

मारुत्वती-मदन-माद्यद्-अपाङ्ग-सङ्घैः
कातर्य-विस्मय-सुहृत्त्व-मृदु-प्रसङ्गैः ।
इन्दीवर-स्रग्-अभि-मण्डितवद् विभान्ती
श्रेयः तनोतु शर-सम्भव-गण्ड-पाली ॥ श्लो. ८॥

(वसन्ततिलक - Metre : Vasantatilaka - 14 Syllables per quarter)
(मारुत्वती - Devasena, the daughter of Indra, शर-सम्भव - Sharavanabhava (Subrahmanya). This verse says that Devasena′s dark side-glances, filled with love and admiration, settle upon Subrahmanyas face (cheek region) like a garland of blue lilies.)

## अष्टपदी - ३

श्लोकौ -
वने वल्लीं भिल्लीं विकच-नवमल्ली-मृदु-तनुं
मुहुर्नत्वा स्मृत्वा गुह-गुणम् अरुद्धा धृति-लवम् ।
स्मराधीनां दीनां ज्वरं असहमानां विरहजं
सखी वाणीं एणी-शिशु-दृशं अभाणीत् सुधिषणा ॥ श्लो. ९॥

(शिखरिणी - Metre : Shikharini - 17 Syllables per quarter)

(The intelligent Sakhi told the doe-eyed Valli the following.)

तव श्रान्त्याः शान्त्यै प्रियसखि निशा-जागर-परि-
श्रमात् पद्म उशीरादि उपहरण-जातादपि मुहुः ।
प्रबुद्धा निद्रायाः स्वयं उपनताया अहमहो
ब्रुवे स्वप्नोदन्तं श्रुणु समवधेहि त्यज शुचम् ॥ श्लो. १०॥

(शिखरिणी - Metre: Shikharini - 17 Syllables per quarter)

(Dear friend, to remove your tiredness, which is born from staying awake, and increased by the lotus and Vettiver etc. I shall narrate my dream. Listen attentively and give up your sorrow.)

अष्टपदी - ३ Vasanta Raga, Adi Tala

स्कन्द-महीभृति राजत-भूधर-शृङ्ग-गते भृश-तुङ्गे ।
नवमणि-मण्डल-मण्डित-सौध-तलान्तिक-केसर-रङ्गे ॥ १॥

पल्लवी
सखि शृणु वलरिपु-दुहितृ-सदेशे ।
हृष्यति हर-तनुभूः सुरभौ इह लसद् उप-कानन-देशे ॥

मधुर-मरन्द-मदाकुल-मञ्जुल-गीत-मिलिन्द-कदम्बे ।
विकच-कुसुम-भर-नामित-भासुर-केसर-तरु-निकुरुम्बे ॥ २॥

पथिक-मनो-भृश-कम्पन-पण्डित-चम्पक-सम्पदुदारे ।
सुललित-वकुल-कुलोल्लासन-वति धूलि-विधूनित-तीरे ॥ ३॥

दिनमणि-कर-परिरम्भ-विकस्वर-सारसिनी-रमणीये ।

रुचिर-मृणाल-लतासन-सुहित-मराल-निनद-कमनीये ॥ ४॥

मनसिज-नरपति-सहकृति-पटुतम-पुष्पित-मन्त्र-रसाले ।
सुम-समय-श्री-तिलक-मतिप्रथ-तिलक-महीरुह-जाले ॥ ५॥

पुष्पित-माधविका-परिरम्भण-विकसित-चारु-लवङ्गे ।
मदन-कृपाण-भ्रमकर-किंशुक-धुत-पथिकाब्ज-दृगङ्गे ॥ ६॥

कुपित-वधूजन-मान-निवारण-हर्षित-युवजन-गम्ये ।
सौरभ-पल्लव-चर्वण-पुष्यत्-कोकिल-कूजन-रम्ये ॥ ७॥

कुरबक-रेणु-समावृत-दश-दिशि विदलित-नील-तमाले ।
युवजन-रतिज-श्रमजल-वारक-मलयज-मारुत-बाले ॥ ८॥

विश्वनाथ-कविना रचितं इदं षण्मुख-भक्ति-निदानम् ।
सुरभि-समय-वन-वर्णन-निरतं जयतु चिरं भुवि गानम् ॥ ९॥

(राजत-भूधर - Silver mountain (Kailasa), वलरिपु-दुहितृ - Devasena, the daughter of Indra, हर-तनुभूः - son of Shiva, उप-कानन - garden. The verses describe various trees and flowers in Spring.)

श्लोकौ -

मदकल-कलकण्ठी-कन्धर-अनर्गल उद्यत्-
कलकल-रव-पूरैः पोषयन् पञ्चबाणम् ।
घट-भव-गिरि-जातो वात-पोतो अभियातः
तपति विरहि-चेतो मार-सेनाधि-नेता ॥ श्लो. ११॥

(मालिनी - Metre: Malini - 15 Syllables per quarter)
(घट-भव-गिरि - Malayachala, the mountain of Agastya. This verse describes the cuckoos cooing and the spring breeze blowing)

उत्फुल्लन्-नव-मल्लिका-परिमल-उद्गार-प्रियम्भावुक-
श्रीखण्डाचल-वात-धूत-विकसत् चाम्पेय-भूमी-रुहाः । (श्रीकण्ठाचल)
भृङ्गालिङ्गित-भृङ्ग-झङ्कृति-महा-हुङ्कार-सन्तर्जितैः
नीयन्ते कथमपि अमी विरहिभिः वासन्तिकाः वासराः ॥ श्लो. १२॥

(शार्दूल-विक्रीडितं Metre: Shardula-vikridita - 19 Syllables per quarter)

(प्रियम्भावुक - Wanting to please, श्रीकण्ठाचल - Shiva's mountain (Kailasa), झङ्कृति - buzzing)

## अष्टपदी - ४

श्लोकः -

स्वसेवनायात-सुपर्व-यौवत-
प्रसाधनाभ्यर्हित-रामणीयकम् ।
कुमारं -आराम-गतं स्मरन्ती असौ
सखी बभाषे पुनरेव वल्लिकाम् ॥ श्लो. १३॥

(वंश-स्थविलम् -Metre- Vamsha-sthavilam - 12 Syllables per quarter)
(Here the Sakhi continues to describe the sport of the Lord. सुपर्व-यौवत - Celestial young women, आराम - garden )

अष्टपदी - ४ Ramakriya Raga, Adi Tala

कुण्डल-मण्डित-गण्ड-तलाञ्चित-षण्मुख-पङ्कज-शाली ।
सान्ध्य-पयोद-तटिद्-भ्रमदायि-क्रोडक-नवमणि-माली ॥ १॥

पल्लवी
गुह इह खेलति केलि-परे । विबुध-विलास-वधू-निकरे ॥

गायति काचन सुन्दर-वीणा-गुण-रणनोद्यत-हस्ता ।
तोयज-वदना कोकिल-कूजित-हुङ्कृति-करणे शस्ता ॥ २॥

नृत्यति काचन चलमणि-हारं ललित-विहार-मुदारम् ।
नित्यमुदं परितोषयितुं गुहं अकृतक-वाणी-सारम् ॥ ३॥

काचन परिमल-पूरित-दश-दिश-मृग-मदं अङ्गज-लोला ।
स्पर्श-सुखानुबुभूषुः अकार्षीद् अधि-निटिलं सुरबाला ॥ ४॥

काचन मलयज-पङ्क-विलेपन-कैतवतो गुह-गात्रम् ।
हृषित-तनूरुहं आस्पृशति स्वयं अङ्गज-पौरुष-पात्रम् ॥ ५॥

बाहु-युगेन मृदङ्ग-वरं परिरभ्य मुदाऽऽशयमेका ।
वादन-नर्तित-वाह-मयूरं व्यञ्जयति स्वं अभीका ॥ ६॥

केचन युवति-जना विलसन्-मणि-नूपुर-नाद-मखेदम् ।

विदधति मण्डल-लास्य-विलासं स-वलय-करतल-वादम् ॥ ७॥

काचन हृष्यति काचन खिद्यति काचन लिखति पृथिव्याम् ।
काचन लज्जित-वदना तिष्ठति हसति च काचिद् अटव्याम् ॥ ८॥

विश्वनाथ-कवि-भाषितं इदमपि कलयतु कुशलं अशेषम् ।
कलित-ललित-पुरशासन-सूनोः स्वैर-विलास-विशेषम् ॥ ९॥

(सान्ध्य-पयोद - Evening cloud, अकृतक-वाणी - Vedas , अभीका - fearless, पुरशासन-सूनु - Son of Shiva)

श्लोकाः -

सर्वानन्दन इन्दु-सुन्दर-मुखः कान्तां उपान्त-स्थितां
पश्यन् सस्मितं अप्सरः-कुलमपि स्वच्छन्द-लीला आकुलम् ।
आनन्दाम्बुधि-मग्न-चेतनं अयं कुर्वन् अपाङ्गेक्षणैः
भद्रं कन्दलयतु अमन्दं अनिशं चन्द्रार्ध-भृत्-नन्दनः ॥ श्लो. १४॥

(शार्दूल-विक्रीडितम् - Shardula-vikriditam Metre : 19 Syllables per quarter)
(चन्द्रार्ध-भृन्-नन्दनः - Son of Shiva. This verse describes Subrahmanya casting smiling glances at Devasena seated nearby, and at the Apsaras. "May he increase our welfare" says the last line.)

कङ्केली-प्रसवाभि-भूषित-वपुः कञ्जेक्षणालिङ्गितः
कण्ठेकाल-सुतः कनत्-कुरबक- अम्भोज-स्रग् - उद्भासितः ।
काश्मीर-द्रव-सिक्त-चन्दन-रसालिप्तो विदध्यात् शुभम्
कन्दर्पायुत-कोटि-कान्ति-रनिशं शृङ्गार-सम्राड् असौ ॥ श्लो. १५॥

(शार्दूल-विक्रीडितम् - Shardula-vikriditam Metre : 19 Syllables per quarter)
(This verse describes Subrahmanya decorated with Asoka, Henna and lotus flowers, and anointed with saffron and sandal. कण्ठेकाल-सुतः - Son of Shiva.)

कल्याणाचल-कार्मुकाचल-शिला-बाभास्यमानः स्मरत्-
सन्तापापह-चित्र-बन्धन-लसत्-स्कन्दाचल आरामकः ।
पायाद् अस्खलित-आत्मशक्तिः अनिशं शक्तिं कराब्जे वहन्
स्निग्ध-आखण्डल-नन्दना-सहचरः सामोद-सोमोदयः ॥ श्लो. १६॥

(शार्दूल-विक्रीडितम् - Shardula-vikriditam Metre : 19 Syllables per quarter)

(आखण्डल-नन्दना - Daughter of Indra (Devasena), This verse describes Subrahmanya resplendent with Devasena on a rock of Kailasa mountain. सोमोदयः- One born from Shiva)

इति श्रीविश्वनाथ-कृतौ गीत-गाङ्गेय-काव्ये सामोद-सोमोदयो नाम प्रथमःसर्गः ।

(Thus ends the First Chapter of GeetaGangeya, titled "Joyous son of Shiva" )

## अष्टपदी - ५

श्लोकः -

श्रुत्वा स्वीय-सखी-वचो वनचरी कृच्छ्रेण शय्या-तलात्
उत्थाय अतनु-ताप-वेपित-तनुः निश्वास-पर्याकुला ।
विश्वस्य आत्म-सखीं सगद्गदमिदं बाष्पायमाणा अब्रवीत्
विश्वाधीश-गजास्य-सोदर-महा-लावण्य-कृष्टान्तरा ॥ श्लो. १७॥

(शार्दूल-विक्रीडितम् - Shardula-vikriditam Metre : 19 Syllables per quarter)

(Hearing her Sakhi's words, Valli sat up sighing and replied with tears, remembering her Lord, the brother of Ganesha. अतनु - Manmatha )

अष्टपदी - ५ Todi Raga, Adi Tala

कुञ्जर-वदन-सहोदरं आश्रित-जन-परिपालन-धीरम् ।
मधुपैः सम्भृत-मञ्जु-मधूद्भव-पुष्प-विचित्रित-हारम् ॥ १॥

पल्लवी
शैले गुहं इह कलित-विहारम् । सखि कलये हृदि गिरिश-कुमारम् ॥

मेचक-राजित-मेचकि-तल्लज-वाहनं आत्त-शरासम् ।
हसित-पचेलिम-बिम्ब-फलाधर-सङ्क्रमणाञ्चित-हासम् ॥ २॥

किङ्किणि-सङ्गि-शुकोदर-सोदर-मणि-घटिताङ्गिक-भाजम् ।
कीर-मुखाकृति-नख-मुख-शीलित-वलरिपुजोद्य-दुरोजम् ॥ ३॥

अधर-तलाहित-सुमधुर-वैणव-राव-वशीकृत-लोकम् ।
केतु-समुज्ज्वल-तम-चरणायुध-बोधित-वैबुध-लोकम् ॥ ४॥

पञ्चशराकृति-वञ्चन-दीक्षित-विग्रह-कान्ति-मनोज्ञम् ।
वारण-वदन-सुरारि-कलेवर-दारण-लब्ध-समज्ञम् ॥ ५॥

काञ्चन-तन्तु-विनिर्मित-चेल-विभासुर-नैज-वलग्नम् ।

परम-दयालुतया लघु-तारित-संसृति-सागर-मग्नम् ॥ ६॥

श्रुति-पुट-मूल-गतातिकृपा-रस-सार्द्र-विलोचन-कञ्जम् ।
वैणिक-मुनिवर-वीणा-वर्णित-सङ्गत-शुभगुण-पुञ्जम् ॥ ७॥

मुखरित-हाटक-कल्पित-काञ्ची-परिहित-कटि-गत-चेलम् ।
मणि-मकुटी-परिरञ्जित-शीर्षं दैवत-सैनिक-पालम् ॥ ८॥

विश्वनाथ-कवि-भणितं इदं गुह-मोदकरं सुविकासम् ।
भजतु सदैव कुमार-गुणावलि-वर्णन-तत्त्व-विलासम् ॥ ९॥

(This Ashtapadi has an exquisite description of the form and virtues of Subrahmanya. **मेचकि-तल्लज** - excellent peacock, **शुकोदर-सोदर** - soft and green like a parrot′s belly, **वैणव-राव** - the sound of the Venu (Flute), **केतु** - flag, **चरणायुध** - the rooster, **वैणिक-मुनिवर** - Sage Narada)

## अष्टपदी - ६

श्लोकः -

प्रतपति सदा कामे का मे गतिः भविता अधुना ?
दहति पवनश्चेतो न इतो अस्ति उपाय उदासितुम् ।
विहरति निजारामं कामं गते अपि शिवात्मजे
सखि मम मनो मानं नूनं जहाति करोमि किम् ? ॥ श्लो. १८॥

(**हरिणी** - Harini Metre - 17 Syllables per quarter)
(Valli is forlorn, remembers Subrahmanya and asks her Sakhi what she could do?)

अष्टपदी - ६ Kambhoji Raga, Triputa Tala

विरचित-कङ्कु-वन अवनया कृत-तरुण-वनेचर-वेषम् ।
द्रावित-शुक-पिक-शारिकया धृत-पटु-मृगया-परितोषम् ॥ १॥

पल्लवी
सहसा सङ्गमय सखि शूरम् । नव-नव-कौसुमशर-शर-वेदनया अद्य मया सुकुमारम् ॥

सरभस-वेपित-मानसया बहु-सरस-कथा-विशदेहम् ।
शबर-वर - आगति-सव्यथया श्रित-ललित-तम -आसन-देहम् ॥ २॥

जनक-प्रतिगति-हर्षितया परिधृत-युव-तल्लज-रूपम् ।

तत्-पुनरागमन आकुलया धृत-भृश-जरठ-द्विज-रूपम् ॥ ३॥

काङ्कव-सक्तु-मधु-प्रदया निज-सलिल-तृषं कथयन्तम् ।
कुमरी-सरसीं सहगतया स्मर-वचन-भरं विकिरन्तम् ॥ ४॥

प्रयतन-शतकेन अवशाया परिदर्शित-गज-हेरम्बम् ।
भय-भर-कलित आलिङ्गनया दर-हसितं विहितालम्बम् ॥ ५॥

गतवति करिणि विसाध्वसया स्वयं अभिदर्शित-निज-मूर्तिम् ।
मर्षण-वचन-परायणया मधुरस-भाषण-दलितार्तिम् ॥ ६॥

विशदित-मन्मथ-विक्रियया रह आशु नयन्तं कुञ्जम् ।
लज्जित-मुकुलित-लोचनया रद-पट-जुषं अधि-सुम-मञ्चम् ॥ ७॥

पुलकित-चुम्बित-विग्रहया बहुविध-सुरत-भवानन्दम् ।
प्रमद-रसामृत-पूरितया स्फुट-हित-सरस-वचो-वृन्दम् ॥ ८॥

विश्वनाथ-कवि-गीतं इदं शरवणभव-गुण-परिपूर्णम् ।
शिथिलित-दुरित-गणं सततं भुवि जयतु सदा शुभ-वर्णम् ॥ ९॥

(कङ्कु-वनावन - Protecting the millet field, काङ्कव-सक्तु-मधु - Millet flour and honey, शबर-वर - King of Hunters (Nambiraja), ललित-तमासन - Most beautiful Asana (Indian Laurel) tree, जरठ-द्विज - Aged Brahmin)

श्लोकाः -

स्वच्छं गुच्छ-समुन्मिषत्-सुमभरं माध्वी-समास्वादना-
श्रान्त-भ्रान्त-मधुव्रताञ्चित-शिखं क्रूरं प्रवीरः स्मरः ।
मल्ली-वल्लि-जुषं विषाङ्कित-शरच्छायं हरिण्यां इव
ग्राहं ग्राहं अहो मयि प्रकुरुते शार्दूल-विक्रीडितम् ॥ श्लो. १९॥

(शार्दूल-विक्रीडितम् - Shardula-vikriditam Metre : 19 Syllables per quarter. The metre′s name is cleverly woven into the verse. शरच्छायं - Series of arrows, हरिणी - a doe, ग्राहं ग्राहं - wanting to capture, शार्दूल-विक्रीडितम् - tiger′s game)

परीपाकोद्रेकात् परिमल-भृतानां सुमनसां
परागैः मालत्या वियद् अनवकाशं विरचयन् ।
उदर्कस्थ अगस्त्य व्रति शिखरि - नीत अगरु-खुरैः
समुत्पन्नः स्वान्तं श्वसन इह सीमन्तयति मे ॥ श्लो. २०॥

(शिखरिणी - Metre : Shikharini - 17 Syllables per quarter)

(This verse describes the spring breeze from Agastya′s Malayachala Mountain. The metre′s name (Shikharini) is cleverly woven into the verse. खुर - perfume श्वसन - wind , सीमन्तयति - splits)

स्वाहा-वल्लभ-भाग्य-पार-महिमा नीहार-शैलात्मजा-
स्नेहालोकित-रामणीयक-वपुः बाहा-गृहीत-इन्द्रभूः ।
मोहान्ध असुर-मर्दनैक-निरतो वाहायित अजाधिपो
माहादेव-मनो-विनोदन-पटुस्तु ईहां प्रभुः पूरयेत् ॥ श्लो. २१ ॥

(शार्दूल-विक्रीडितम् - Shardula-vikriditam Metre : 19 Syllables per quarter)

(May Subrahmanya, the fortune of Agnideva, the beloved son of Parvati, the one who embraced the daughter of Indra, the destroyer of deluded Asuras, the one who made the great goat his vehicle, the delighter of Shiva, fulfill all our desires. स्वाहा-वल्लभ - Agni, इन्द्रभू - Devasena, माहादेव - of Shiva.)

पातु शक्त्यायुधो अक्लेशो लीला-लालस-मानसः ।
वल्ली-मनः-पयोजन्म-विकासन-दिवाकरः ॥ श्लो. २२ ॥

(अनुष्टुभ् - Metre - Anushtubh - 8 syllables per quarter)

(The sportive Subrahmanya, holding the Vel, (spear), is the sun that makes the heart-lotus of Valli bloom.)

इति श्रीविश्वनाथ-कविकृतौ गीत-गाङ्गेय-काव्ये अक्लेश-शक्त्यायुधो नाम द्वितीयः सर्गः ।

(Thus ends the Second Chapter of GeetaGangeya, titled “Unafflicted Spear-bearer”)

## अष्टपदी - ७

श्लोकाः -

सुकुमारः कुमारोऽपि मान्यां व्याधेश-कन्यकाम् ।
अनन्य-मानसां स्मृत्वा कैतवात् निर्ययौ गिरेः ॥ श्लो. २३ ॥

(अनुष्टुभ् - Metre - Anushtubh - 8 syllables per quarter)

(व्याधेश - Hunter king)

वनेचराधीश-सुतां स्मरार्दितो वने सनीडे लवली-महीभृतः ।

गवेषयन् तां अविलोकयन् गुहो निषद्य कुञ्जे निभृतं व्यचीचरत् ॥ श्लो. २४॥

(वंश-स्थविलम् -Metre - Vamsha-sthavilam - 12 Syllables per quarter)
(लवली-महीभृतः - Vallimalai)

अत्रैव सा प्राण-समा समागता विलम्बनेन प्रकटापराधिनम् ।
सखी-वृता कुत्र गता विहाय मां, विलोकिता चेद्-विद्धीय सान्त्वनाम् ॥ श्लो. २५॥

(उपजाति -Metre - 12 Syllables per quarter (वंश-स्थविलम् starting with a heavy syllable))
(Subrahmanya searched for Valli everywhere and could not find her)

अष्टपदी - ७ Bhupala Raga, Chapu Tala

नायिका क्व गता प्रतीक्ष्य चिराय मां मदनेन ।
बाधिता कुपिता इव सा इति न निर्णये हृदयेन ॥ १॥

शिव शिव विलोचन-पथे । तां कथं करवाणि ॥ शिव शिव॥

संस्मरामि तदीयं आस्यं - अलङ्कृतं चिकुरेण ।
सारसं चलितालिनां इव मण्डितं निकरेण ॥ २॥

सा सहेत रुजं कृशा कथं अर्पितां विरहेण ।
अब्जिनीव मदाकुलस्य मतङ्गजस्य करेण ॥ ३॥

चिन्तयामि तदोष्ठं अद्य मम अर्दितं रदनेन ।
कोमलं नव-चूत-पत्रं इव क्षतं विहगेन ॥ ४॥

किं ब्रवीति किं ईक्षते बहुलाश्रुमन्-नयनेन ।
किं दधाति हृदि प्रिया मम वञ्चिता स्वजनेन ॥ ५॥

सापराधं इमं जनं किमु वीक्ष्य सा सदयेन ।
लोकनेन भवेद् रुषा-रहिता मम अनुनयेन ॥ ६॥

मां उदीक्ष्य वदेद् इयं मम तापदोऽसि धवेति
तां समीक्ष्य कथेयं एव तद्-उत्तरं सविनीति ॥ ७॥

कोमलाङ्गि रुषं विहाय पुरो मम आशु विभाहि ।
काम-तान्तं इदं मनः कुरु मोद-पूर-वगाहि ॥ ८॥

विश्वनाथ-कवेरिदं वच आदधातु फलेन ।
श्रीशिवात्मज-तोषदायि शुभं नृणां पठनेन ॥ ९॥

श्लोकौ -

तापं मा कुरु माधवात्मज वृथा चेष्टां विमुञ्चाधुना
त्रैलोक्य एक-धनुर्धर त्वदनुजा एव आस्ते अन्तरङ्गे मम ।
दीने तद्विरहानलार्त-वपुषा सङ्गेन शङ्काकुले
किन्नु स्यात् सहजा-धवे प्रयतनं युष्मादृशां साम्प्रतम् ॥ श्लो. २६ ॥

(शार्दूल-विक्रीडितम् - Shardula-vikriditam Metre : 19 Syllables per quarter)
(माधवात्मज - Son of Vishnu, Manmatha. Valli being Vishnu′s daughter originally, is his sister. सहजा-धव - sister′s husband)

स्वैराधीर-वियोग-सञ्ज्वर-वचो-व्याहारकृत् कानने
सङ्कल्पाधिगत-प्रिया-तनु-परीरम्भ-प्रसज्जत्करः ।
वल्ली-लालस-मानसः तदुचितं भूषा-विशेषं वहन्
भव्यं नः सुकुमार एष कुरुता-माद्यः कुमारः सदा ॥ श्लो. २७॥

(शार्दूल-विक्रीडितम् - Shardula-vikriditam Metre : 19 Syllables per quarter)

इति श्रीविश्वनाथ-कविकृतौ गीत-गाङ्गेय-काव्ये सुकुमार-कुमारो नाम तृतीयः सर्गः ।
(Thus ends the Chapter Three of GeetaGangeya, titled ”Tender Kumara” )

## अष्टपदी - ८

श्लोकः -

उपाद्रि-कुञ्ज-निलयं बहुलानन्द-वर्धनम् ।
वल्ली-वयस्या वासन्ती वाचं ऊचे सगद्गदम् ॥ श्लो. २८॥

(अनुष्टुभ् - Anushtubh Metre - 8 syllables per quarter)
(बहुलानन्द-वर्धन - dear son of Krittikas, वयस्या - Sakhi )

अष्टपदी - ८ Saurashtra Raga, Adi Tala

कोकिल-काकलिकां अपि कलयति कर्ण-पुटे अति-कठोरम् ।
दर्पक-भट-कुल-वीर-वचन-ततिं इव विशदित-मद-सारम् ॥ १ ॥

पल्लवी
तापमिता तव जाया श्रीगुह । शबर-नृपति तनया स्मर-वेदनया दयनीया ।

स्वानुभवेन कला-भृतं अतुहिन-करं अहरीश-समानम्

निश्चिनुते कारण-गुण-सङ्क्रम-नय-मपि कुरुते मानम् ॥ २॥

मनसि करोति पटीर-महीध्र-समीर-किशोर-विहारम् ।
पितृपति-हरिद् - अधि-गमन-वशाद् इव दुःसह-वैशस-घोरम् ॥ ३॥

हृदय-कुहर-निलयस्य सुमायुध-बाण-पथाद् अवनं ते ।
स्थगयति हृदयं कलयितुं असकृत् कर-युगतः सदनं ते ॥ ४॥

चित्र-पटे प्रविलिख्य भवन्तं काङ्क्षित-वती अनुनेतुम् ।
लेखन-वस्तु परमपि सकम्पा न अशकद् एव ग्रहीतुम् ॥ ५॥

धरति तनौ स्मर-गद-युजि नीरस-कीर्ण-कुसुमशर-जालम् ।
मेचक-दृगिव वियोगि-मृगान्तक-मदन-वनेचर-जालम् ॥ ६॥

कलयति शैत्योपचरणं अपि बहु-परिजन-कलितं अपार्थम् ।
वेदि-गत - अनल- विहितं इव घृतं ताप-सुपोष-समर्थम् ॥ ७॥

ध्यायति नन्दति पश्यति मूर्छति सीदति गायति शेते ।
श्वसिति स्विद्यति झटिति धवेति च निगदति बाष्पं सूते ॥ ८॥

विश्वनाथ-कवि-भाषितम् इदमपि गुहपर-तर-कमनीयम् ।
गुह-विरहार्दित-वनचर-दुहितृ-सखी-वच आदरणीयम् ॥ ९॥

(शबर-नृपति तनया - Hunter-king's daughter Valli, अहरीश -The Sun, पटीर-महीध्र - Sandal Hill (Malayachala), पितृपति-हरिद् - The direction of Yama (South), मेचक-दृग - Black-eyed doe, अपार्थम् - useles)

## अष्टपदी - ९

श्लोकः -

प्रसून-शयनीयं अपि अतनु-बाण-तल्पायते
पटीरज-रजो अङ्गजानल-चलत्-स्फुलिङ्गायते ।
युगान्त-मिहिरायते तनुभुवः शशी षट्पद-
ध्वनिश्च कुलिशायते विपिनचारि-पृथ्वीशितुः ॥ श्लो. २९॥

(पृथ्वी - Prthvi Metre - 17 Syllables per quarter)
(विपिनचारि-पृथ्वीशितुः तनुभू - daughter of the hunter king)

अष्टपदी - ९ Raga Bilahari/Desakshi, Tala Triputa

करतल-गतमपि हल्लक-सूनम् ।
सा तनुते कुवलयं इव दूनम् ॥ १॥

पल्लवी
वल्लिका तव विरहे हे गुह ।

उपहृत-बिस-लतिकां अनु-मत्या ।
विषधर-तनुं इव पश्यति भीत्या ॥ २॥

कृत-मलयज-रस-लेपन-दास्याम् ।
रचयति दुःख-चयां स्व-वयस्याम् ॥ ३॥

कुच-घट-तट-धृत-मौक्तिक-मालाम् ।
कुरुते असितमणि-युजमिव नीलाम् ॥ ४॥

व्यथयति परिजनं उप-तनु-वासम् ।
श्वसित-समीरण-जनित-निरासम् ॥ ५॥

क्वचिद् अभि-तिष्ठति मलय-समीरम् ।
विरहि-युगानलं अरसा धीरम् ॥ ६॥

कुञ्जग-मञ्जुल-मधुकर-नादम् ।
निर्णयते गुरुं अशनि-निनादम् ॥ ७॥

प्रतिकलं अञ्जलि-कृद् अधि-निटालम् ।
वदति गुह इति सबाष्प-कपोलम् ॥ ८॥

विश्वनाथ-कवि-विरचित-गीतम् ।
भवतु सुखाय नृणां अविगीतम् ॥ ९॥

(हल्लक - red lotus, दूनम् - wilted, अरसा - weak , अविगीतम् - blameless)

श्लोकाः -

शेते तिष्ठति याति च प्रलपति भ्राम्यति अभि-ध्यायति
प्रोन्मीलति अभिधावति प्रजपति हि उत्तिष्ठति स्रंसते ।
दीर्घं निःश्वसिति क्षणेन हसति कृश्यति अनङ्ग-ज्वरे
तत्तादृशी अपि जीवति त्वयि रसात् तां पाहि देव द्रुतम् ॥ श्लो.३०॥

(शार्दूल-विक्रीडितम् - Shardula-vikriditam Metre : 19 Syllables per quarter)

दूरोदञ्चित-पञ्चशाख-मखभुक्-सन्दोह-सम्प्रार्थना-
साफल्याय शिताग्र-शक्ति-दलित-क्रौञ्चाचलादेः प्रभोः ।
संसक्तेन्द्र-सुता-पयोधर-तटी-काश्मीरजाङ्कस्य ते
सानन्दस्य शुभाय सन्तु इह महासेनस्य दृष्ट्यञ्चलाः ॥ श्लो. ३१॥

(शार्दूल-विक्रीडितम् - Shardula-vikriditam Metre : 19 Syllables per quarter)

(May the side glances of Mahasena(Subrahmanya), the Lord who split the Krauncha mountain to fructify the prayers of Indra made with hands joined above his head, give us auspiciouness. दूरोदञ्चित-पञ्चशाख - hand lifted high up, मखभुक् - Indra, दृष्ट्यञ्चलाः - side-glances)

इति श्री-विश्वनाथ-कृतौ गीत-गाङ्गेय-काव्ये सानन्द-महासेनो नाम चतुर्थः सर्गः ॥

(Thus ends the Chapter Four of GeetaGangeya, titled ”Blissful Mahasena” )

## अष्टपदी - १०

श्लोकः -

इह गिरि-निकटे करोमि वासं, द्रुत-तरं आनयने यतस्व तस्याः ।
इति गुह-कथितं निशम्य वाक्यं, सविनयं एत्य सखी जगाद वल्लीम् ॥ श्लो. ३२॥

(पुष्पिताग्रा - Pushpitagra Metre : 12 + 13 Syllables in each half)

(Sakhi comes to Valli as instructed by the Lord, and speaks to her)

अष्टपदी - १० Anandabhairavi Raga, Adi Tala

क्वणति मधुरनिधाने पिक इह रुजं एति ।
चलति विरहि-कदने मरुति स शुचं उपयाति ॥ १॥

पल्लवी
तव कमनो विरही ते । सखि सीदति वल्लि ॥

हसति वकुल-कलापे धृतिं अति विजहाति ।
रणति समद-मधुपे रजसि भुजं उपदधाति ॥ २॥

लसति कुमुद-सहाये सति वसति निलीय ।
कनति कुरबक-चये विरमति गिरं अभिधाय ॥ ३॥

वसति गहन-कुटीरे परिजनं अपहाय ।
श्वसिति विमल-मुकुरे प्रतिकृतिं अलघु विधाय ॥ ४॥

वदति सुविश्वनाथे मृड-सुत-भजनाय ।
मनसि कृत-शुभ-कथे गुह उदयतु कुशलाय ॥ ५॥

(Only five stanzas are found in the sources. This Ashtapadi has different Matras in each line : First line 11+ 9 Matras, Second line 10+11 Matras. कमन - beloved, धृति - fortitude, कुमुद्-सहाय - moon)

## अष्टपदी - ११

श्लोकः -

पूर्वं यत्र सह त्वया सुमशरो देवेन सिद्धार्थितः
तत्र त्वच्छयनासने परिमृशन् साश्रं बहु व्याहरन् ।
ध्यायं ध्यायमपि त्वदीय-वदनं नामापि सङ्कीर्तयन्
स्तब्धः त्वद्-रदनच्छदामृत-रसास्वादं गुहो वाञ्छति ॥ श्लो. ३३॥

(शार्दूल-विक्रीडितम् - Shardula-vikriditam Metre : 19 Syllables per quarter)
(ध्यायं ध्यायं - constantly thinking of)

अष्टपदी - ११ Kedara Gaula Raga, Adi Tala

मलयज-वाते स्वयं उपयाते सरभसं अञ्जलि-कारी ।
पृच्छति कुशलं तावकं अखिलं सर्वगं अमुं अभिसारी ॥ १॥

पल्लवी
शैल-सनीडे कुसुमापीडे निवसति वीरुधगारे ।
अर्धेन्दीवर-बान्धव-शेखर-नन्दन इत सहकारे ॥

गूहति कर्णं प्रसृजति तूर्णं स्मर-गुण-शिञ्जित-भेदे ।
पतदपि पर्णं शिरसि न कीर्णं बुध्यति विसरति खेदे ॥ २॥

मरुद् उपनीतं चम्पक-चूतं विकच-सुमौघ-मजस्रम् ।
मत्वा आनङ्गीं आनल-भङ्गीं अम्मयं असृजद् इव अस्त्रम् ॥ ३॥

चन्दन-सारं सघुसृण-नीरं गोपयितुं सितिमानम् ।
अभिद्रुतं अङ्गे प्रसरदनङ्गे धरति श्रमजल-लीनम् ॥ ४॥

निनदति हंसे कमल-वतंसे त्वद् अभिगति-धिया शङ्के ।
सज्जति भवतीं वरतनु सुदतीं दृढ-मुपगूहितुं अङ्के ॥ ५॥

पल्लव-तल्पं पावक-कल्पं भवति विभोः इति मन्ये ।
ग्लपित-शरीराद् अतनु-विकाराद्-वनचर-नायक-कन्ये ॥ ६॥

मा कुरु शोकं तनु तं अशोकं सफलयितुं झष-केतुम् ।
न कुरु विलम्बं मुख-शशि-बिम्बं सहसितं एहि विधातुम् ॥ ७॥

स्मर-कृत-ताडे बहु-विध-पीडे भगवति हे सखि रोषम् ।
न कलय भामिनि विहर विलासिनि शृणु वचनं हतरोषम् ॥ ८॥

विश्वनाथ-कवि-भणितं इदं भुवि सुखयतु गायक-जातम् ।
जगद् अधि-पालन-कृत-गुह-खेलन-वर्णन-तत्पर-गीतम् ॥ ९॥

(वीरुधगार - house made of plants, अर्धेन्दीवर-बान्धव - Crescent moon, स्मर-गुण-शिञ्जित - buzzing of bees which form the bowstring of Manmatha, आनल भङ्गी - wave of fire, झष-केतु - Manmatha )

श्लोकाः -

चकित-हरिणी-दृष्टे पिष्टे न युक्तम्-उदासनम्
सरभस-मुपेत्य एतं शीतं दृढं परिरम्भणात् ।
अतनु-विशिख-ज्वाला-दोलायितं कुरु साम्प्रतं
हृदय-दयित-प्रेम स्थेमानं एतु अविलम्बितम् ॥ श्लो. ३४॥

(हरिणी - Harini Metre : 17 Syllables per quarter)

कुञ्जाद् याति बहिः क्षणं मृगयति त्वत्पाद-मुद्रां वने
पत्रे पत्रिणि वा पतति अपि चलति आशङ्क्य ते अभ्यागतिम् ।
प्रत्यायाति निविश्य कुञ्ज-कुहरं शय्यां स आलोकते
त्वयि आसक्त-मनाः सखीति लपति प्राणप्रिये स्वागतम् ॥ श्लो. ३५॥

(शार्दूल-विक्रीडितम् - Shardula-vikriditam Metre : 19 Syllables per quarter)

वल्ल्या भिल्ल-कुलाधिनायक-तपः-प्राग्भार-सीमा-भुवो
लीला उल्लोल-तराल-कुन्तल-भर-ग्राहे अतिवाहे तनोः ।
वीक्षायां उपगूहने तदधरास्वादे तया भाषणे
सोत्कण्ठः शितिकण्ठजो विदधतां क्षेमान् निकामं स मे ॥ श्लो. ३६॥

(शार्दूल-विक्रीडितम् - Shardula-vikriditam Metre : 19 Syllables per quarter)

इति श्रीविश्वनाथ-कृतौ गीत-गाङ्गेय-काव्ये अभिसारिका-वर्णने सोत्कण्ठ-शितिकण्ठजो नाम पञ्चमःसर्गः ।

(Thus ends the Chapter Five of GeetaGangeya, titled "Eager Son of Shiva" )

## अष्टपदी - १२

श्लोकः -

अथ कुच-जघन-महिम्ना देह-तनिम्ना सखी सहाया ताम् ।
स्खलित-पदां पथि वल्लीं निवेश्य मल्ली-गृहे गुहं प्राह ॥ श्लो. ३७॥

(आर्या - Arya Metre 12-18 Matras in each line )

अष्टपदी - १२ Shankarabharana Raga, Chapu Tala

इच्छति तव परिरम्भणं एषा ।
विरह-महागद-कृत-तनु-शोषा ॥ १॥

पल्लवी
लोकपते सर्व-लोकपते ।
श्राम्यति वल्ली कुञ्ज-गृहे ॥

जपति सततमपि भवद् अभिधानम् ।
विकिरति नयनज-जलं अतिमानम् ॥ २॥

मनसिज-कल्पितं अत्रभवन्तम् ।
पश्यति सकल-दिशासु वसन्तम् ॥ ३॥

कथं अभिसरति न तदनु, वयस्ये ।
शरवण-भव ? इति वदति रहस्ये ॥ ४॥

खग-गति-शङ्कित-भवद् अभि-गमना ।
परिहित-शिथिलित-कृश-कटि-वसना ॥ ५॥

पेशल-किसलय-कृत-कर-वलया ।
श्वसिति भवति विरचित-हृदय-लया ॥ ६॥

भवद् अभिसरण अमित-रस-लग्ना ।

पदि पदि निपतति वलदवलग्ना ॥ ७॥

मुह्यति करतल-शयित-कपोला ।
स्निह्यति हृष्यति वनचर-बाला ॥ ८॥

विश्वनाथ-कवि-गिर-मनुवारम् ।
पठत नमत शशि-मकुट-कुमारम् ॥ ९॥

श्लोकाः -

अलं अधिक-विलम्बेन अभिसर्तुं यतेथाः
सफलय तव चेतो-वल्लभाया अभीष्टम् ।
विरह-विकल-पादा सा अभिसारे अपि अशक्ता
वसति विरचयन्ती बाष्प-सार्द्रं निकुञ्जम् ॥ श्लो. ३८॥

(मालिनी - Malini Metre - 15 Syllables per quarter)

(The Sakhi urges Subrahmanya to not delay and come to meet Valli)

आगच्छेत् मम चित्तबन्धुः अचिराद् आनन्दयेत् निर्भरम्
कृत्वा आश्लेषं अथाधरं ननु पिबेद् रोमाञ्चयेद्-विग्रहम् ।
इति आकल्पित-कल्पना-शत-पथे निःशङ्क-गच्छन्-मतिं
तां बालां परिपालयेः करुणया दीनानुकम्पिन् प्रभो ॥ श्लो. ३९॥

(शार्दूल-विक्रीडितम् - Shardula-vikriditam Metre : 19 Syllables per quarter)

ईप्सन्ती भवदागमं मम सखी सज्जी-करोति अञ्जसा
शय्यां सूनमयीं व्यपोहति रजो वस्त्राञ्चलेन क्षणात् ।
आकल्पं कुरुते नवं नवं अपि इति उक्तिं निशम्य आदरात्
धन्यो मोद-युतो अस्तु मे सपदि सुब्रह्मण्य आनन्ददः ॥ श्लो. ४०॥

(शार्दूल-विक्रीडितम् - Shardula-vikriditam Metre : 19 Syllables per quarter)

इति श्री-विश्वनाथ-कृतौ गीत-गाङ्गेय-काव्ये वासक-सज्जिका-वर्णने धन्य-सुब्रह्मण्यो नाम षष्ठः सर्गः

(Thus ends the Chapter Six of GeetaGangeya, titled ”Blessed Subrahmanya“ )

# अष्टपदी - १३

श्लोकौ -

चन्द्रः तमो अच्छतनुः आशु करैर्निपीतं
कुक्षौ कलङ्क-कपटेन वहन् तदानीम् ।
खेदानलं विरहिणां अपि मार-साह्यात्
संवर्धयन् जलधिना समं आविरासीत् ॥ श्लो. ४१ ॥

(वसन्ततिलक - Metre : Vasantatilaka - 14 Syllables per quarter)
(The moon-rise is described here, with his blemish seeming to be all the darkness devoured by him stored inside him)

उदयति कुवलय-बन्धौ मानस-बन्धौ च न आगते वल्ली ।
मुञ्चन्ती अविरतं अस्रं व्यलपद् अजस्रं विमुक्त-कण्ठं सा ॥ श्लो. ४२ ॥

(आर्या - Arya Metre 12-18 Matras in each line )

अष्टपदी १३ Ahiri Raga, Jhampa Tala

झटिति गुह आगमन-शपथ-शत-भाषणम् ।
वितथयति विफलयति मामक-विभूषणम् ॥ १ ॥

पल्लवी
किं ब्रुवे विषम-विरहम् -सहे कथं अति-विलोभिता ॥

विषमगुण-विषमशर-योधपति-खेटके ।
भवति शश-भृति क इह शरण-मवसादके ॥ २ ॥

कुलज-मृगदृग् अनुचितं अभिसरणं आश्रयम् ।
अनुभवति तदिह मम हृद् अतनु-शर आमयम् ॥ ३ ॥

ललित-सुम-शयनं अपि मम करतलास्तृतम् ।
विरचयति मनसिज-विषादं अति-विस्तृतम् ॥ ४ ॥

रहसि मम कुञ्ज-गृह-वसतिः इह मामिका ।
प्रियतम-पराङ्मुखतया दलित-कौतुका ॥ ५ ॥

आयत-निनाद-कर-कोक-युवती तु इयम् ।
अनुनयति मां इव सखी सकरुणोदयम् ॥ ६ ॥

अहह बहु सीदामि कमलिनी इव अधुना ।
मद् इतरा उत्पलिनी इव तुष्यति स्वामिना ॥ ७॥

अदयं इह यदि स इति भजति रस-भञ्जनम् ।
प्रथमं अति तेन किमु कलितं अनुरञ्जनम् ॥ ८॥

कवि-विश्वनाथ-कलिता इयं अति-कोमला ।
मोदयतु रसिकं इह कृतिः अमित-मङ्गळा ॥ ९॥

(विषमशर, अतनु - Manmatha, शश-भृत - Moon, मृगदृग् - Doe-eyed woman, कोक-युवती - Chakravaka bird, कमलिनी - Lotus plant, उत्पलिनी - Lily plant)

श्लोकः -

तत् किं स्वीय-जनावृतः ? किमु सखी न अवैक्षत स्वामिनम् ?
किं पादाम्बुज-सक्त-भक्त-जनता अभीष्ट-प्रदाने रतः ? ।
किं वा भाग्यजुषा रहः सुवपुषा जुष्टो अन्यया योषया ?
मां अन्विष्य चरति अयं किमु वने ? कुञ्जं स यन्नागतः ॥ श्लो. ४३॥

(शार्दूल-विक्रीडितम् - Shardula-vikriditam Metre : 19 Syllables per quarter)
(Valli wonders about the possible reasons for the Lord's delay)

## अष्टपदी - १४

श्लोकः -

गतां गुहाभ्यर्णं उपागतां तां
सखीं अथ प्राण-धवाद् ऋते सा ।
दृष्ट्वा विषण्णां परिशङ्क्य देवं
सक्तं कयाचिद्-विरहिणी अथ आह ॥ श्लो. ४४॥

(उपजाति - Upajati Metre - 11 Syllables per quarter)
(प्राण-धव - Beloved husband)

अष्टपदी १४  Saranga Raga, Chapu Talam

मृग-मद-बिन्दु-परिष्कृत-फाला ।
कच-धृत-विकसित-विचकिल-माला ॥ १॥

पल्लवी

काऽपि गिरिश-भुवा । विहरति नलिन-दृग् अभिनवा ॥

पति-विलिखित-मकरिक-कुच-कलशा ।
चपल-कलेवर-चल-वसन-दशा ॥ २॥

श्रमजल-लेश-करम्बित-वदना ।
धव-मृदु-पाणिज-शिथिलित-रशना ॥ ३॥

सत्रप-मुकुलित-नयन-कुवलया ।
सरभस-चञ्चल-करमणि-वलया ॥ ४॥

गुह-परिरम्भ-सपुलक-शरीरा ।
कुसुम-शरासन-विग्रह-धीरा ॥ ५॥

विगलित-कुन्तल-सुमभृत-मञ्चा ।
सफलित-सृष्टि-विधायि-विरिञ्चा ॥ ६॥

शीत्कृति-कर-रदनपट-युग-धरा ।
दरहस-सूचित-निज-सुख-विसरा ॥ ७॥

मणित-रणित-परिपोषित-मारा ।
कलकल-रव-रशन-जघन-भारा ॥ ८॥

विश्वनाथ-कवि-भणितं अविरतम् ।
गुह-रसिकं कलयतु सुख-भरितम् ॥ ९॥

(विचकिल -jasmine, नलिन-दृग् - Lotus-eyed woman)

श्लोकः -

कुमुद-बन्धुर-बन्धुः अहो मम स्व-महसा मह-साधन-पण्डितः ।
कुसुम-मार्गण-मार्गणवत् करान् अलघयन् लघयन् मन एधते ॥ श्लो. ४५॥

(द्रुत-विलम्बित - Druta-vilambita Metre, 12 syllables per quarter)
(मह - great deeds, मार्गण -arrow, अलघयन् - undiminishing , लघयन् - weakening)

## अष्टपदी - १५

श्लोकौ -

अत्रान्तरे दैवत-राज-पुत्रीं श्यामां उदूढां शशि-मौलि-सूनुः ।

वल्लीं अभाणीत् प्रतिपालयन्तीं स्मृत्वा जगाम इति सखी सशोकम् ॥ श्लो. ४६ ॥

(उपजाति - Upajati Metre - 11 Syllables per quarter )
(दैवत-राज-पुत्री - Daughter of Indra , उदूढां - wedded)

निशम्य वचनं वल्ली वयस्या-वदन-च्युतम् ।
सबाष्पं विललाप उच्चैः दृष्ट्वा इव गुह-चेष्टितम् ॥ श्लो. ४७॥

(अनुष्टुभ् - Anushtubh Metre - 8 Syllables per quarter)

अष्टपदी - १५ Saveri Raga, Chapu Tala

उपमित-मुदिरे तरुणी-चिकुरे कर्षण-शिथिली-कृते ।
रचयति मसृणं सुरभि सघुसृणं तटिद् उपमितं आयते ॥ १॥

पल्लवी
कुरुते विहृतिं निजभवने । शरजो विहार-विपिने ॥

स दशन-वसने बहुरस-सदने सुघटित-मदनाहवे ।
स्फुट-सुम-मृदुलं रद-पद-पटलं विकिरति मधुरास्रवे ॥ २॥

लुलित-कचभरे सुमशर-मुकुरे सुललितं अति कोमले ।
वितरति तिलकं सहसितं अधिकं पुलकित-गण्डस्थले ॥ ३॥

घन-जघन-तटे गलित-चल-पटे कलकल-रव-मेखले ।
घटयति वसनं सुरुचिर-रचनं ललित-पुलिन-मञ्जुले ॥ ४॥

कुच-कलश-युगे गिरिवर-सुभगे झरमिव मदनावहे ।
विमल-मणिसरं सरभस-मधुरं कलयति कमला-गृहे ॥ ५॥

जित-बिस-कुसुमे हिम-किरण-समे सगुणमिव मुखे नते ।
श्रमजल-निचयं स्वनयन-विषयं प्रविदधद् अतिमोदते ॥ ६॥

कमल-वद् अरुणे ललना-चरणे गति-कृत-वरटा-जये ।
स्थिरयति वितुलं नूपुर-युगलं विदलित-मदनामये ॥ ७॥

सखि मम विजने स्थितं इह गहने मद-गजमुख-सोदरे ।
सुरपति-कन्यां रमयति धन्यां विफलं इदं अनादरे ॥ ८॥

शरभव-शरणे कथित-गुणगणे श्रीकवि-विश्वनाथे ।
कथयति सरलं सहृदय-हृदयं सरतु सुरबल-नाथे ॥ ९॥

(मुदिर - cloud, शरज - Sharavanabhava(Subrahmanya), प्रविद्धद् अतिमोदते - notices and rejoices, वरटा - swan)

# अष्टपदी - १६

श्लोकः -

मा तापं भज हे सखि ! प्रियतमो न आयात इत्याशये
स अयं नन्दतु मां प्रतार्य महिलां अन्यां गृहीत्वा शठः ।
वातो वातु दरो विराजतु मधुश्रीः कोकिलः कूजतु
प्रद्युम्नो मुदं एतु गच्छतु मम स्वान्तं मुखेन्दुं प्रभोः ॥ श्लो. ४८॥

(शार्दूल-विक्रीडितम् - Shardula-vikriditam Metre : 19 Syllables per quarter)
(प्रद्युम्न - Manmatha, मधुश्रीः - Beauty of Spring)

अष्टपदी - १६ (Punnagavarali Raga, Adi Tala)

मनसिज-मदहर-रुचि-भरितेन ।
श्रयति न सा शुचं अलि-विरुतेन ॥ १॥

पल्लवी
या सहिता शिव-सूनुना सखि ।

श्रुतिपथ-परिसर-सर-नयनेन ।
भजति न सा रुजं उडु-कमनेन ॥ २॥

छवि-धुत-हिमकर-मुख-कमलेन ।
श्वसिति न सा कुरवक-मुकुलेन ॥ ३॥

धृत-बहुविध-मणि-मुकुट-वरेण ।
लुठति न सा पिक-रणित-भरेण ॥ ४॥

अरुण-किरण-निभ-मृदु-वसनेन ।
ज्वलति न सा विहरण-विपिनेन ॥ ५॥

किसलय-सहचर-कर-युगलेन ।
वहति न सा श्रमभरं अनिलेन ॥ ६॥

भ्रमरित-सुर-कच-पद-जलजेन ।
द्रवति न सा कठिन-हृदयजेन ॥ ७॥

रस-जित-सुध-मृदु-तम-वचनेन ।
दलति न सा सुम-तति-शयनेन ॥ ८॥

विश्वनाथ-कवि-कृत-रचनेन ।
गुह इह विशतु सहृदयं अनेन ॥ ९॥

(उडु-कमन - Moon, भ्रमरित-सुर-कच-पद-जलज - One at whose lotus-feet, the heads of the Devas lie like bees)

श्लोकौ -

मन्दानिल त्वं मदनान्तक आत्मज-
च्छात्र अद्रि-जातोऽसि न साम्प्रतं तव ।
मित्रत्वं आश्रित्य मनोभुवो मयि
क्लेश-प्रदानं गुह-गामि-चेतसि ॥ श्लो. ४९॥

(इन्द्र वंश - Metre - Indravamsha - 12 Syllables per quarter)
(मदनान्तक आत्मज - Son of Shiva छात्र- (His) disciple, Agastya अद्रि - (his) mountain Malayachala)

वल्ली शोच्यतमां गता अद्य विपिने अवस्थां अतनु आतपात्
प्रम्लान-प्रसवा अनवाप्य लुठति स्थाणवङ्गज आश्लेषणम् ।
पातु आकर्ण्य सुरर्षि-भाषितं इदं पौरन्दरीं वञ्चयन्
बालां नागरिको ब्रुवन् वनलतां रक्ष इति सेनापतिः ॥ श्लो. ५०॥

(शार्दूल-विक्रीडितम् - Shardula-vikriditam Metre : 19 Syllables per quarter)
(स्थाणवङ्गज - Son of Shiva अतनु आतप - Torment of Manmatha, सुरर्षि - Narada, पौरन्दरी - Devasena)

इति श्रीविश्वनाथकवि-कृतौ श्रीगीतगाङ्गेय-काव्ये विप्रलब्धा-वर्णने नागरिक-सेनापतिर्नाम सप्तमः सर्गः

(Thus ends the Seventh Chapter of GeetaGangeya, titled “Courtly Commander” )

## अष्टपदी - १७

श्लोकः -

कथमपि रजनीं अथ व्यतीत्य स्मर-दलिता अपि पुरोगतं निशान्ते ।
गुहं अनुनय-कारिणं निरीक्ष्य प्रणय-रुषा स्फुरदोष्ठं आह वल्ली ॥ श्लो. ५१ ॥

(पुष्पिताग्रा - Pushpitagra 12,13 Syllables in each half)

(Valli speaks with anger arising from love, to her Lord)

अष्टपदी - १७ (Arabhi Raga, Adi Tala)

रजनि-कलित-सतत असम-शर-रण-जागरतो अरुणिमानम् ।
वहति तव ईक्षण-युगं अरुणाम्बुज-मिव विकसितं अतिमानम् ॥ १ ॥

पल्लवी
चारुनायक चारुसाधक याहि विधेहि न वादम् ।
प्रीणय तां गिरि-राज-सुताङ्गज या तव जनयति मोदम् ॥

प्रथयति तव कृत-चित्रक-कुच-युग-लाञ्छनं उरसि विशाले ।
कुवलय-नयना-दृढ-परिरम्भण-सम्भ्रम-रसं अनुकूले ॥ २ ॥

मुखमपि तावकं अनुसरति प्रिय-जनक-सकुङ्कुम-शोणम् ।
सान्ध्य-पयोधर-रञ्जितं अनिशित-करं अविकल-परिमाणम् ॥ ३ ॥

रद-पद-भूषित-भवदधरोऽयं फलितमिव लसति बिम्बम् ।
केलि-शुकी-मुख-सरभस-विरचित-निबिडित-चिह्न-कदम्बम् ॥ ४ ॥

उडुपति-गणमिव करज-पदावलिं अञ्चति तावकं अङ्गम् ।
हरिदुपल-सरच्छवि-हरिताभं सारवं अमित-तरङ्गम् ॥ ५ ॥

सुतनु-दृगञ्जन-रञ्जित-सम्मद-जल-लवकं तव चेलम् ।
जयपटं अनुहरति मकर-केतोः मषि-लिखिताक्षर-जालम् ॥ ६ ॥

स्फुटयति तव पद-कमल-युगं गमनालसं एतद् अपारम् ।
समुचित-बन्धन-शत-लसिताद्भुत-सुरत-महोत्सव-सारम् ॥ ७ ॥

तां उपयाहि चिरायसे इह यदि, या भवद् अभिमत-योषा ।
रोष-युतापि भवेद् अनुपदमपि भवद् अनुनय-कृत-तोषा ॥ ८ ॥

विश्वनाथ-कवि-भाषितं इदमिह विबुधजना अनुवारम् ।
खण्डित-रति-तरुणी-कृत-वचनं कुरुत गिरि सपरिवारम् ॥ ९ ॥

(गिरि-राज-सुताङ्गज - Son of Parvati, सान्ध्य-पयोधर - Evening cloud, फलित - ripe, हरिदुपल-सर - emerald necklace, सारव - Waters of Sarayu, सम्मद-जल - tears of joy)

श्लोकौ -

मुखं ते पश्यन्त्याः सरद-पद-दन्तच्छदमपि
प्ररूढोरोजाङ्कं कितव भुजयोः अन्तरमपि ।
मम अभूद् आमोदः क्षण-विरहितां तां अनुनयेः
नमस्तेऽस्तु स्वामिन् अलं अहृदयैः चाटु-निचयैः ॥ श्लो. ५२॥

(शिखरिणी - Shikharini Metre - 17 Syllables per quarter)
(अहृदय - insincere)

वल्ली-षड्वदनौ विलोक्य हसति प्रातः सखीनां गणे
मुद्रावर्ण-सुवर्ण-कङ्कण-गण अगाधाङ्क-कण्ठ-स्थलौ ।
वल्लीं नम्रमुखीं विशाख उरसा धृत्वा विलक्षो अन्तरम्
नीत्वा स्व उन्नमित एतदास्य-कमलामोद उत्सुकः पातु नः ॥ श्लो. ५३॥

(शार्दूल विक्रीडितम् - Shardula Vikriditam Metre - 19 Syllables per quarter)
(अगाध - deep, आस्य-कमल - Lotus-face )

इति श्रीविश्वनाथ-कवि-कृतौ श्रीगीत-गाङ्गेय-काव्ये खण्डिता-वर्णने विलक्ष-विशाखो नाम अष्टमस्सर्गः ॥

(Thus ends the Eighth Chapter of GeetaGangeya, titled “Abashed Vishakha” )

## अष्टपदी - १८

श्लोकः -

कुसुम-शरासन-दूनां रति-सुख-हीनां नवागसा दीनाम् ।
धृत-मद-कलहाधीनां अजहन्-मौनां सखी जगाद एनाम् ॥ श्लो. ५४॥

(आर्या -Arya Metre - 12-18 Matras in each half)
(The Sakhi advises Valli to give up her anger)

अष्टपदी - १८ (Yadukula Kambhoji Raga, Adi Tala)

गुहं उपनतं इह चिरं अभिलषितम् ।
कलय नयन-विषयं धुरि विनतम् ॥ १॥

पल्लवी

षण्मुखे मा भव भामिनि रोष-युता ॥

सखि तव सुमधुर-मधुरस-सदनम् ।
कथमिव वितथयसि रदन-वसनम् ॥ २॥

तरुणिम-वल्गितं उरसिज-युगलम् ।
सफलय सङ्गत-पति-कर-कमलम् ॥ ३॥

तव मधु-पवन-चला तनुः एतम् ।
श्लिष्यतु जगद् अवलम्बन-भूतम् ॥ ४॥

किं कुरुषे सरले सति मानम् ।
मौनमपि धरसि कथं अनिदानम् ॥ ५॥

विसृज रुषं सृज हर्षज-वाष्पम् ।
सुखय शरज-मपि शकलित-बाष्पम् ॥ ६॥

पवन-चपल-सरसीरुह-नयने ।
धवं उपसर मृदु-किसलय-शयने ॥ ७॥

अनुनय-वचन-विधायिनं एनम् ।
जीवय विरचय मोद-निधानम् ॥ ८॥

विश्वनाथ-कवि-भाषित-गीतम् ।
मुदितं इदं रचयतु बुध-जातम् ॥ ९॥

(धुरि - in front , अनिदानम् - without reason धव - husband)

श्लोकौ -

आयासीद् आयताक्षि प्रसव-शर-समो वीप्सया प्रेप्सितो यः
पश्य अवश्याय-शुभ्रां तनुमपि विरहाद् अस्य रस्या त्वमेव ।
श्रुत्वा युक्तं मद् उक्तं वचनं अति-हितं प्रीणयेः प्राणनाथं
भोग्यं भाग्यं विहातुं सखि समुपनतं साम्प्रतं साम्प्रतं किम् ॥ श्लो. ५५॥

(स्रग्धरा - Sragdhara Metre : 21 Syllables per quarter)

(प्रसव-शर-सम - Resembling Manmatha, वीप्सा - repetition, अवश्याय - snow, रस्या - captivating, साम्प्रतं - proper, साम्प्रतं - now)

।

सेवा-सक्त-पुरन्दरादि-दिविषत्-सीमन्तिनी-कन्धरा-

नृत्यन्-मङ्गळ-सूत्र-दार्ढ्य-करणासक्ति-प्रशस्त उद्यमाम् ।
आम्यानीत-विनीत-वीर-निकर-प्रक्रान्त-सम्भावनाम्
शक्तिं पाणि-तले धरन् वनचरी-मुग्धो विदध्यात् शुभम् ॥ श्लो. ५६ ॥

(शार्दूल-विक्रीडितम् - Shardula-vikriditam Metre : 19 Syllables per quarter)
(May Subrahmanya, holding the Vel (spear) that is renowned for making stable the Mangala Sutras of the wives of Devas led by Indra, charmed by Valli the forest girl, give us welfare.)

इति श्रीविश्वनाथ-कवि-कृतौ श्री-गीतगाङ्गेय-काव्ये कलहान्तरिता-वर्णने मुग्ध-शक्तिधरो नाम नवमस्सर्गः ॥

(Thus ends the Ninth Chapter of GeetaGangeya, titled "Charmed Shaktidhara" )

## अष्टपदी - १९

श्लोकः -

तां सुन्दरीं तदनु लक्षण-सूचितागाः
उत्कम्पित-स्तनं उदश्रु च दूयमानाम् ।
निश्वास-वात-चपली-कृत-काननान्तां
स्वामी सगद्गदं इदं वचनं बभाषे ॥ श्लो. ५७॥

(वसन्ततिलक - Vasantatilaka Metre - 14 Syllables per quarter)
(दूयमाना - sorrowful, सगद्गदं - in a choked voice)

अष्टपदी - १९ (Mukhari Raga, Jhampa Tala)

तरुणि मयि दारुणं अहेतुक-रुषारुणं, नहि विकिर तव नयन-कोणम् ।
अयं इह समीहते श्रित-करुणं ईक्षणं, तावक-जनो मदन-शोणम् ॥ १ ॥

पल्लवी
हिते साधुरीते । वल्लि मयि मा अभिनय कोपम् ।
वहति मधु-मारुते मम मनसि जायते । का अपि गतिः उपशमय तापम् ॥

किमिति चलिताधरं लुलित-कबरी-भरं, परिगलित-बाष्प-रस-धारम् ।
तिष्ठसि समाकुला किं उचितं इदं ब्रुवे, त्यज शोकं इमं अति-गभीरम् ॥ २॥

मधुर-वचनेन सुधया सम-तुरेण तव जीवय सुमेषु-कृश-रूपम् ।
वहसि करुणावति न किञ्चिदपि नायके मयि तपति सात्त्वं अनुतापम् ॥ ३॥

मन्तुं अभिशङ्कसे यदि रमणि मामकं, तथ्यं एव आकलय दण्डम् ।
भुज-युगल-परिणहनं आचर कलेवरे, शिखरि-रद-लेखं अधितुण्डम् ॥ ४॥

कुरु ललित-रशनया मणि-घटितया सहे, प्रहतिं अयि धीरं अधिदेहम् ।
भय-पिशाचक-पलायन-कृते मन्त्रिणो, वेत्र-लतिका-हतिं इव अहम् ॥ ५॥

मदन-विशिखाहति-व्रण-निकर-निबिडितं, क्रोडतलं आश्रित-निदाघम् ।
सुखय कलयन्ती अचिर-कृत-कुच-निवेशनं, गाढ-परिरम्भणं अमोघम् ॥ ६ ॥

घटय मणि-कुण्डले श्रवण-युगले सुमुखि, नूपुरमपि प्रणय पादम् ।
मुखरय च मेखलां सरभस-समागमे, मोदय निवारय विषादम् ॥ ७॥

कर-सरसिजेन ते परिमलय वपुरिदं मलयज-रसेन कृत-सेकम् ।
मम मुखं वीटिका-घुमघुमितं आकलय, शीतलय मानसं अशोकम् ॥ ८॥

श्रीविश्वनाथ-कवि-भणितं अगजा-भुवो, वल्लिकां प्रति वचन-वृन्दम् ।
गुह-भजन-पर-रसिक-जनमनो-मोदकं, जयतु भुवि पेशलं अमन्दम् ॥ ९॥

(तुर - excellent, मन्तु - fault, परिणहन - fastening, वीटिका-घुमघुमित - fragrant with betel leaves, अगजा-भुव - Son of Parvati. With these verses the Lord appeases Valli)

श्लोकाः -

सुतनु विसृज आशङ्कां किं कातरा असि मयि स्थिते
सततमपि मे वल्ली भिल्लीति भान्ति गिरो मुखे ।
हृदय-सदने तु अन्या कन्या न वासं उपेयुषी
तद् अलं इयता वामं कामं प्रमोदय मामपि ॥ श्लो. ५८॥

(हरिणी - Harini metre 17 Syllables per quarter)
(गिर - words)

कुवलय-नयने तव आनता भ्रूः
सुमशर-कार्मुक-दण्ड एव तस्मात् ।
अभिहतं उदितैः कटाक्ष-बाणैः
अधर-सुधास्वरसेन जीवयेः माम् ॥ श्लो. ५९॥

(पुष्पिताग्रा - Pushpitagra Metre - 12,13 Syllables in each half )

प्राणाधीश्वरि वीक्षसे त्वं अधरा आलोकाभिलाषा-धरे
विश्वास अनुविधायके मयि परं श्वासान् सृजसि आयतान् ।

प्राप्ता यत् परुषत्वं अपि अपरुषे अनङ्ग-प्रसङ्गोद्यते
युक्तं त्वां अनुसृत्य वच्मि तनुया अङ्गानुषङ्ग उद्यमम् ॥ श्लो. ६० ॥

(शार्दूल-विक्रीडितम् - Shardula-vikriditam Metre : 19 Syllables per quarter)

का इयं नाथ महेन्द्रजे शबरजा किं नाम वल्ली प्रिये
किं कार्यं तव सेवनं किमु फलं सापत्न्यं इति ऊह्यते ।
तत्किं ते अभिमतं कथं भवद् अभिप्रायो निरस्यो हठात्
एवं प्रश्न-सदुत्तरेषु चतुरः षाण्मातुरः पातु नः ॥ श्लो. ६१ ॥

(शार्दूल-विक्रीडितम् - Shardula-vikriditam Metre : 19 Syllables per quarter)
(This verse is a dialogue between Subrahmanya and Devasena, where He introduces Valli tactfully to her)

इति श्रीविश्वनाथ-कवि-कृतौ श्रीगीत-गाङ्गेय-काव्ये मानिनी-वर्णने चतुर-षाण्मातुरो नाम दशमस्सर्गः ॥

(Thus ends the Tenth Chapter of GeetaGangeya, titled “Skilful Shanmatura” )

## अष्टपदी - २०

श्लोकः -

अथ शरवण-जाते सान्त्वयित्वा आत्मबन्धुं
गतवति रति-सज्जे रम्य-कुञ्जम् रहस्यम् ।
रचित-विविध-भूषां वल्लिकां काचिद् आली
सति रजनि-मुखे तां सादरं प्राह वाणीम् ॥ श्लो. ६२ ॥

(मालिनी - Malini Metre : 15 Syllables per quarter)
(आली - Sakhi)

अष्टपदी - २० Kalyani Raga, Chapu Tala

अतिमृदु-पल्लव-शयन-युतं श्रित-वञ्जुल-मूल-विभागम् ।
कोमल-कुञ्जगृहं भवतीं प्रतिपाल्य गतं अतुल-रागम् ॥ १ ॥

पल्लवी
रम्ये शिव-तनुजम् वल्लि । उपगतं उपचर वल्लि ॥

चलित-दलैः अपि अभिसृति-कुञ्ज उपाह्वयति इव सरागम् ।

अलि-निनदैः अभिसर गुरुजघने मां अवलम्ब्य सवेगम् ॥ २॥

भवद् अभिसरण-विबोधिकया सखि पिक-गण-नाद-विदीर्णम् ।
हंसक-कलकल-रव-सुधया परिपूरय नायक-कर्णम् ॥ ३॥

शरवण-जनुषे सखि विनिवेद्य मलय-समीर-किशोरम् ।
भवति निकटके सुखयति मामिति सानुभवं सुख-पूरम् ॥ ४॥

तव गलनाद-सहोदर-कलगल-मधुर-निनाद उदारे
जनयतु मोदं उपागत-मन्मथ-काहल-रववद् अदूरे ॥ ५॥

रति-कलहे जय पतिं अपराधिनं अधिक-सुखेन भुजाभ्याम् ।
बन्धनं अलघु विधाय निपीड्य च कल्प-लता-सदृशाभ्याम् ॥ ६॥

कुच-कुम्भ-युगं रय-गति-विघ्नं इह आचरति प्रसभं ते ।
तद् अनुभवतु दृढ-निशित-नखाङ्कुश-मुख-दलनं तव कान्ते ॥ ७॥

अधर-रसं परिपायय नाथं तिरय सुधा-रस-चिन्ताम् ।
अनुनय-चाटु-शतेन वयस्ये विसृज सुदूरं अहन्ताम् ॥ ८॥

विश्वनाथ-कवि-भणितमिदं शिवभव-पद-भक्ति-निदानम् ।
विलसतु विबुध-मुखाम्बुरुहे चिरं अति-मधुर-रस-निधानम् ॥ ९॥

(हंसक - anklets, विदीर्णम् - broken, punctuated, कलगल - cuckoo, रय-गति - swift movement)

श्लोकाः -

आगच्छेत् प्रियनायिका अद्य कुशलं पृच्छेत् प्रयच्छेत् च सा
गाढालिङ्गनं अङ्गं उत्पुलकतां गच्छेद् इदं मामकम् ।
इत्थं ध्यायति पश्यति प्रलपति भ्राम्यति असौ गायति
प्रत्येति प्रियं एत्य मञ्जुल-वचः-पुञ्जैः सुखं प्रापयेः ॥ श्लो. ६३॥

(शार्दूल-विक्रीडितम् - Shardula-vikriditam Metre : 19 Syllables per quarter)

कस्तूरी-तिलकायते अधिनिटिलं कर्णे असिताब्जायते
नेत्राम्भोज-युगे अञ्जनायत इयं गाढा तमःसन्ततिः ।
कण्ठे नील-सरायते कटि-तटे श्यामाय-चेलायते
साहाय्यात् स्मर-शासिता अम्बुज-दृशां आनन्द-कन्दायते ॥ श्लो. ६४॥

(शार्दूल-विक्रीडितम् - Shardula-vikriditam Metre : 19 Syllables per quarter)

(गाढा तमःसन्ततिः -dense darkness, स्मर-शासिता - Instructed by Kama, अम्बुज-दृशां - to all lotus-eyed women)

गाढान्धकारं अपि चेतन-जाल-दृष्टेः
सञ्चार-लोप-करणे दृढ-बद्ध-कच्छम् ।
सिद्धाञ्जनं वितनुते हि अभिसारिकाणां
आश्चर्यं एष मदनाभिध-वैद्यराजः ॥ श्लो. ६५॥

(वसन्ततिलक - Vasantatilaka Metre : 14 Syllables per quarter)
(Even when the dense darkness is determined to obscure the vision of all living beings, amazingly, this doctor called Manmatha provides a magical collyrium for the eyes of lotus-eyed women (so that they can find their way to their trysts))

## अष्टपदी - २१

श्लोकः -

वक्रेन्दु-मन्दस्मित-चन्द्रिकाभिः
ध्वस्त अन्धकारे स्थिता अत्र कुञ्जे ।
द्वारि स्थितं वीक्ष्य गुहं सलज्जां
वल्लीं सखी प्राह सहर्षमेवम् ॥ श्लो. ६६॥

(उपजाति - Upajati Metre - 11 Syllables per quarter)

अष्टपदी २१ : Ghanta Raga, Jhampa Tala

केलि-कलना उचित-निकुञ्ज भवने ।
इह विहर दर-हसित-वशित-कमने ॥ १॥

पल्लवी
सुखय बाले सोमधर-सूनुम् ।

मधुकर-निकर-रचित-मधुर-गाने ।
इह विहर गति-विजित-हंस-याने ॥ २॥

सरस-मृदु-कुसुम-चय-रुचिर-शयने ।
इह विहर रस-सदन-सुरभि-वदने ॥ ३॥

सुन्दर-मरन्द-रस-लहरि-शीते ।

इह विहर विपिनचर-नृपति-जाते ॥ ४॥

मधु-पवन-घटित-सुम-सुरभि-पूरे ।
इह विहर मधु-विजयि-वचन-सारे ॥ ५॥

तरुण-शुक-पिक-निकर-कलित-रावे ।
इह विहर कपट-गुण-रहित-भावे ॥ ६॥

सरल-किसलय-निचित-दृढ-विताने ।
इह विहर मुख-मिलित-मधुरपाने ॥ ७॥

मदन-शर-जनित-दर-दलन-धीरे ।
इह विहर जलद-निभ-चिकुर-भारे ॥ ८॥

श्रीविश्वनाथ-कवि-कथित-गानम् ।
कुरुत वदनाम्बुजे कुशल-दानम् ।
भजत रसिकाः सततं ईशं एनम् । ९॥

श्लोकः -

बाले त्वत्प्रतिपालके दृढ-परीरम्भ उत्सुके षण्मुखे
क्रूरैः कौसुम-कार्मुकैः शर-गणैः सन्तापित-स्वान्तरे ।
प्रेम-द्योतक-मन्दहास-लहरी भूयात् तव आह्लादिनी
का इयं भीतिरिह त्वदेक-शरणे निश्शङ्कं अङ्कं भज ॥ श्लो. ६७॥

(शार्दूल-विक्रीडितम् - Shardula-vikriditam Metre : 19 Syllables per quarter)

## अष्टपदी - २२

श्लोकः -
ततः ससाध्वसं वल्ली सहर्षं च लता-गृहम् ।
प्राविशत् षण्मुखास्थानं रणन्-मधुर-नूपुरम् ॥ श्लो. ६८॥

(अनुष्टुभ् - Anusthubh Metre - 8 Syllables per quarter)

अष्टपदी - २२ Madhyamavati Raga, Adi Tala

वल्ली-वदन-विलोकन-विकसित-सरस-विलोचन-भाजम् ।
ह्रदमिव हिमकर-दर्शन-फुल्ल-समधु-रस-नील-सरोजम् ॥ १॥

पल्लवी
गिरिजा-तनुजं समुदित-मदन-विकासम् ।
आससाद सम-हार्दं असौ गुरु-मुदं अधि-कुञ्ज-निवासम् ॥

विद्रुम-सम्पुट-विनिहित-मौक्तिक-मणि-निकरमिव दधानम् ।
दर-हसित-स्फुरिताधर-लसितं रदगणं अधिक-विभानम् ॥ २॥

शिखर-विराजित-जलद-परिष्कृत-कनक-धराधर-शोभम् ।
मसृण-शिरोरुह-भार-विभासुर-शिरसं इमं मिहिराभम् ॥ ३॥

मरकत- तिलक-द्युति-वलित-भ्रू-मण्डित-मञ्जुल-फालम् ।
नवजल-भरित-तटाक-मिव क्रम-तट-सङ्गत-शुक-बालम् ॥ ४॥

हीर-मणी-मय-कुण्डल-कान्ति अनु-रञ्जित-मञ्जु-कपोलम् ।
कोकनदोपरि-सङ्गत-धवलच्छद-कमलाकर-लीलम् ॥ ५॥

तरल-तरल-बहु-विमल-मणि-निचय-कलित-मनोहर-हारम् ।
अनुकृत-वात-चलद्-बहु-बुद्बुद-शोण-नदाम्बु-विहारम् ॥ ६॥

बिभ्रतं अधिकटि कानक-तन्तु-विनिर्मित-चित्रित-चेलम् ।
सन्ध्या-काल-पयोद-मिव स्फुरद् इन्द्र-धनू-रुचि-जालम् ॥ ७॥

अङ्गद-कङ्कण-भूषित-भुजयुगं अद्भुत-गात्र-निवेशम् ।
समदन-चल-कर-सूचित-दयिता-कुच-वहनाभिनिवेशम् ॥ ८॥

वल्ली आलोकज-निजमुदमपि तद्-वचन-समयं अधिधातुम् ।
श्रुति-निकट-गतां दृशं अभिदधतं रुचि-जित-सुम-शर-केतुम् ॥ ९॥

विश्वनाथ-कवि-विरचितं इदमपि गीतं अशेष-बुधानाम् ।
भवतु मुदावहं अनवरतं प्रिय-शिवसुत-चरित-सुधानाम् ॥ १०॥

(ह्रद - Lake, हार्द - affection, कानक तन्तु - golden thread, अधिधातुम् - to augment, अभिदधतं - bring in contact, सुम-शर-केतु - Manmatha's emblem (fish))

श्लोकाः -

सलीलं गच्छन्त्याः चकित-चकितं भर्तृ-सविधम्
मुखेन्दुं पश्यन्त्या अमित-मुदितो बाष्प-विसरः ।
स्मर-म्लानं नाथं स्नपयितुं इव प्राप्त-समयम्
रवि-ग्लानं चन्द्रोपल-जलभरो अद्रेः तटमिव ॥ श्लो. ६९॥

(शिखरिणी - Metre : Shikharini - 17 Syllables per quarter)

प्रचण्ड अमर्त्यारि-प्रमथन-समुच्चण्ड-विभवः
ससौहार्दं पुत्र्या त्रिदश-नृपतेश्चुम्बित इह ।
यदीयो दोर्दण्डो जय-कमलया अमण्ड्यत सदा
स मे सुब्रह्मण्यः कलयतु कला-कौशलमयम् ॥ श्लो. ७० ॥

(शिखरिणी - Metre : Shikharini - 17 Syllables per quarter)

(May Subrahmanya, whose glory caused destruction of fierce Asuras, dear to the daughter of Indra, whose arms are adorned by the goddess of victory, give me expertise in the arts)

कुत्र त्वं वल्लि याता सहचरि कुमरी-तीर्थं एतत् किमर्थम् ।
स्नातुं पातुं च युक्तं कथं अयं अधरः सक्षतः मत्स्य -दंशात् ।
मायी यातः सहायः क्व तव सजरठः कुत्र वा इति ऊर्णुवाणाम्
सानन्दः स्कन्ददेवो वितरतु कुशलं वीक्ष्य साकूतं एताम् ॥ श्लो. ७१ ॥

(स्रग्धरा - Sragdhara Metre - 21 Syllables per quarter)

(This verse describes a conversation between Valli and her Sakhi, after Valli has met Subrahmanya first as an old man, and then in His real form. ऊर्णुवाणा - Concealing)

इति श्रीविश्वनाथ-कवि-कृतौ श्रीगीतगाङ्गेय-काव्ये वल्लिका-मिलने सानन्द-स्कन्ददेवो नाम एकादशः सर्गः ।

(Thus ends the Eleventh Chapter of GeetaGangeya, titled “Joyful Skandadeva” )

# अष्टपदी - २३

श्लोकः -

तदनु सहसा याते कार्यच्छलेन सखीजने
सदर-मधर-स्निग्ध-स्फीत-स्मितार्द्र-नताननाम् ।
कुसुम-शयने न्यस्तापाङ्गा-मनङ्ग-वशंवदाम्
शरवणभवो वाचं प्राह प्रियां सकुतूहलम् ॥ श्लो. ७२ ॥

(हरिणी - Harini Metre - 17 Syllables per quarter)

अष्टपदी - २३ Nadanamakriya Raga, Adi Tala

विकसित-सुम-शयने मम सुन्दरि कलय तव मृदुल-पादौ ।

इदमपि मार्दव-गुणं अधिलभतां स्पर्शन-मणि अविभेदौ ॥ १॥

पल्लवी
कुरु सहसा गौरी-सुतम् । अति-सुखयुजमयि मां वल्लिके ॥

त्यज नहि कश्चिदिह अस्ति सुहासिनि नयन-निमीलनं एवम् ।
पश्य विलज्जं उपागतं अधिक-प्रियं अतिशयित-विभावम् ॥ २॥

वदन-सरोरुह-तल्लज-निर्गलद् अमृत-रसेन नितान्तम् ।
मधुकर-मिव पद्मिनि मां प्रीणय मनसिज-शर-हति-तान्तम् ॥ ३॥

अपहर कञ्चुकं अर्ध-विपाटितं उरसिज-गूहकं एनम् ।
विघटय तापं उरोज-युगं हृदि मम विनिवेश्य सुपीनम् ॥ ४॥

श्लथयितुं अंशुकं इच्छति दयिते विरह-गदं इव जनोऽयम् ।
उररीकुरु मामक-नाथनं इह जीवय मां असहायम् ॥ ५॥

मदनज-कम्पन-चल-घन-जघनक-चल-रशना कल-रावम् ।
घटयितुं अभिलषितं मम तनुते सान्त्वनं इव भज भावम् ॥ ६॥

अतिदूर आगति-खेदयुतं तव चरणयुगं अतिवहेयम् ।
गल-दर-निःसृत-मणि-मथित-श्रम-कण-निकरं अपनयेयम् ॥ ७॥

मनसिज-जय-दुन्दुभि-निनदायित-मणित-रवैः कृत-मोदम् ।
हसित-सुधारस-वचन-कदम्बैः अपनय मानस-खेदम् ॥ ८॥

विश्वनाथ-कवि-निगदितं इदमिह विशदित-षण्मुख-तोषम् ।
विहरतु कण्ठतले अखिल-विदुषां विरचित-बहु-परितोषम् ॥ ९॥

(**स्पर्शन** - gift, **उररीकुरु** - accept , **नाथन** - request)

श्लोकाः -

सा धूनोति करौ सकङ्कण-झणत्कारं जिघृक्षौ प्रिये
वेगाद् आस्य-सुधां करोत्यपि तिरश्चीनं पिपासौ मुखम् ।
मा मा मेति च भाषते हठ-समाश्लेषं चिकीर्षौ गिरम्
पुष्णाति अस्य तथा अपि सम्मदमिदं कामस्य लीलायितम् ॥ श्लो. ७३॥

(**शार्दूल-विक्रीडितम्** - Shardula-vikriditam Metre : 19 Syllables per quarter)
(**धूनोति** - shakes)

उद्युक्ता दयितं विजेतुं अधुना सौमेषवे सङ्गरे
दोर्वल्ली-दृढ-बन्धनानि अति-दृढोरोज-द्वयास्फालनम् ।
तीक्ष्णाग्रै-र्दशनै-र्नखैश्च दलनं चक्रे तथा अपि अञ्जसा
श्रान्ता एषा हि अबलात्वं उत्पल-दृशां युक्तं कुतोऽस्तु अन्यथा ॥ श्लो. ७४॥

(शार्दूल-विक्रीडितम् - Shardula-vikriditam Metre : 19 Syllables per quarter)

केशा आकुलितास्स्रजो विगलिताः स्विद्यन्-मुखाम्भोरुहं
श्वेता दन्तपटी श्लथा भुजलता निश्चेष्टितौ च स्तनौ ।
शोणा नेत्रयुगी नख-क्षत-परिक्लिष्टं च वल्या वपुः
तां आदाय तथा अपि मोहनकरीं दोर्भ्यां ननन्द प्रभुः ॥ श्लो. ७५॥

(शार्दूल-विक्रीडितम् - Shardula-vikriditam Metre : 19 Syllables per quarter)

## अष्टपदी - २४

अथ वल्ली रति-रभस-श्रान्ता सप्रेम-वचनं इदं ऊचे ।
सानन्दं शिवसूनुं मन्दं मन्दं मरन्द-रस-रुचिरम् ॥ श्लो. ७६॥

(आर्या - Arya Metre 12-18 Matras in each line)

अष्टपदी - २४ (Mangalakausika Raga, Eka Tala)

प्रिय शिवसम्भव ! लम्बय मृगमद-चित्रकं अत्रपं एव मे
वदन-तले विमले मधुकर-मिव पुष्कर-पुष्प-मनोरमे ॥ १

पल्लवी
शिवनन्दने शुभ-मानसा खेलति । कथयामास सा ॥

अधरं इमं मम निर्मित-यावक-लेपज-रूप-विभासुरम् ।
कलय निरन्तर-दन्तपदं तव सरभसं एव सहादरम् ॥ २॥

घन-निभ-चिकुर-कुलं मम मण्डय केलि-कला-मरुद् आकुलम् ।
बहुविध-कुसुमित-सुम-तति-कृत-चपलायित-मालिकया अतुलम् ॥ ३॥

प्रतनु सुमुख-सविशेष-विशेषकं अति-निबिडोरसिज-द्वये ।
हिम-घनसार-पटीर-रसेन मतङ्गज-कुम्भ-तटाद्वये ॥ ४॥

अधिकटि योजय मे जयशक्ति-धर स्वयं उत्स्वन-मेखलाम् ।
हरित-पटोपरि तृण-तति-गत-हरिगोप-गुणावलि-मञ्जुलाम् ॥ ५॥

आकलय अञ्जन-रञ्जनं आश्रित-कञ्जन-भञ्जन-नैपुणे ।
प्रमद्-निरर्गल-निर्गलदश्रु-निसर्ग-विसर्ग-युजि ईक्षणे ॥ ६॥

कङ्कणं अङ्गद-सङ्गतं इह कुरु मम चतुरेण करेण ते ।
बाहौ गुच्छ-लसच्छवि-रज्यद् अशोक-भृशोपम आयते ॥ ७॥

श्रवसि च कुण्डल-मण्डल-मण्डनं उरसि विलासय मालिकाम् ।
रति-विषमं च समं सकलं कुरु मम परिपालय नायिकाम् ॥ ८॥

विश्वनाथ-कवि-विरचितं उचितं प्रियशिव-सम्भव-सङ्कथे ।
लसतु रसजुषां चेतसि विदुषां पूर्ण-पुराण-मनोरथे ॥ ९॥

श्लोकाः -

अथ स करुणा-सिन्धुः बन्धुः पुलिन्द-तनू-भुवो
व्यरचयद् अयं दक्षो वक्षोरुहे मकरीक्रियाम् ।
हृदि परिकरोदारं हारं रणन्-मणि-नूपुरम्
रुचिर-वसनं नेत्रे श्रोत्रे अञ्जनं मणि-कुण्डलम् ॥ श्लो. ७७॥

(हरिणी - Harini Metre - 17 Syllables per quarter)

उद्यन्-मान्मथ-जन्य-जन्य-चलन-स्थाना विभूषाः पुनः
सौहार्देन समं वनेचर-भुवि स्वामी प्रतिष्ठापयन् ।
प्राप्त एतत्प्रिय-बान्धव अनुमतिः अपि एनां उदूह्य अनया
प्राप्य स्कन्दगिरिं सुतां सुरपतेः तन्वन् ददातु श्रियम् ॥ श्लो. ७८॥

(शार्दूल-विक्रीडितम् - Shardula-vikriditam Metre : 19 Syllables per quarter)
(After adorning Valli lovingly with ornaments, Subrahmanya married her with her dear relatives′ permission and reached Devasena in Skandagiri with her. तन्वन् - reaching )

मधुरमिति मरन्दं फाणितं च इक्षुसारं
मधु-रसमपि दुग्धं मन्यतां अन्य एव ।
गुह-भजन-पराणां सार-सङ्ग्राहकाणाम्
अति-मधुरमिदं स्याद्-गीत-गाङ्गेयं एव ॥ श्लो. ७९॥

(मालिनी - Malini Metre - 15 Syllables per quarter)
(Others may think honey, syrup and sugarcane juice, milk etc. are sweet. To those who are engrossed in praising Guha, this Gita Gangeyam is very sweet. फाणितं - syrup )

सकारुण्यः पायात् स्मर-विजयि-लावण्य-जलधिः
तरुण्याश्लिष्ट अङ्गः सुर-परिषद् अग्रणी अभिनतः ।
शरण्यो लोकानां त्रिदश-मुनि-पण्य अमित-गुणः
स मां सुब्रह्मण्यः शिखि-गिरि-वरेण्याग्र-सदनः ॥ श्लो. ८० ॥

(शिखरिणी - Shikharini Metre - 17 Syllables per quarter)

(May Subrahmanya, the merciful one, surpassing Manmatha in beauty, embraced by the youthful Devasena and Valli, saluted by Indra, refuge of the world, extolled for his qualities by Devas and Rishis, resident of Kunrakkudi, protect me)

वल्ली-सस्मित-काम-मन्थर-चल अपाङ्ग-प्रभामण्डली-
व्याकोच अर्जुन-मेचक उत्पल-सर-भ्राजत् शिरोधिः सदा ।
सुप्रीतः सुम-शेखरस्य तनुजो अस्माकं स्व-भक्तेष्ट-कृत्
सुब्रह्मण्य उदार-मङ्गल-निधिः सम्पादयेन्-मङ्गलम् ॥ श्लो. ८१ ॥

(शार्दूल-विक्रीडितम् - Shardula-vikriditam Metre : 19 Syllables per quarter)

(May the delighted son of Shiva, Subrahmanya, whose neck seems to be adorned with a garland of white and blue lilies, due to Valli′s (white) smiles and loving (dark-eyed) glances, give us welfare. सुम-शेखरस्य तनुज - Son of Shiva.)

रम्यं श्रीविश्वनाथः कविःअवदद् इदं गीतगाङ्गेय-काव्यम्
श्रीमत्-कानाडु कात्तान् पुरवरसदनः शाब्दिकः स्कन्द-भक्तः ।
गृह्णन्तः स्कन्द-भक्ताः मुदमपि परमां ते अपि विन्दन्तु गानात्
पुष्टिं दार्ढ्यं च भक्तिं श्रियं अति-बहुलां सन्ततं प्राप्नुवन्तु ॥ श्लो. ८२ ॥

(स्रग्धरा - Sragdhara Metre : 21 Syllables per quarter)

(Vishvanatha Kavi, a grammarian, resident of Kanadukathan, devotee of Skanda, composed this charming Gita Gangeyam. May devotees of Skanda take it, obtain great joy by singing it, and obtain strength, health, devotion and immense wealth always)

इति श्रीविश्वनाथ-कवि-कृतौ श्री-गीतगाङ्गेय-काव्ये स्वाधीन-भर्तृका-वर्णने सुप्रीत- सुब्रह्मण्यो नाम द्वादशस्सर्गः ।

(Thus ends the Twelfth Chapter of GeetaGangeya, titled “Very delighted Subrahmanya” )

इति श्रीनवसाल-राजधानी-विराजमान-श्रीगोकर्ण-क्षेत्रवर-सन्निहित-श्वेतनदीतीर-बाभास्यमान-श्रीशिवपुर-अग्रहाराभिजनस्य, कानाडु-कात्तान्-नगरी-निवासिनः, श्रीरामसुब्रह्मण्य-

सुधीन्द्रसूनोः, श्रीबालाम्बिका-गर्भशुक्ति-शौक्तिकेयस्य, शाब्दिकस्य, श्रीमद्-रामायाणादि-तत्व-विवेचकस्य,
श्रीविश्वनाथकवेः कृतिषु, श्री गीतगाङ्गेय-काव्यं सम्पूर्णम् ॥

Thus is completed, the Gita Gangeya Kavyam, one among the works of Sri Vishvanatha Kavi, who is among the good people born in Shivapura Agrahara, which shines on the banks of Vennaru, where the Gokarna Kshetra is situated in Pudukkottai town, who is the resident of Kanadukathan town, the son of Sri Ramasubrahmanya and the pearl from the womb of Srimati Balambika, a grammarian and scholar of Ramayana and other texts.

Notes :

1. In every Ashtapadi, the Pallavi is sung after every stanza, as a refrain.
2. Hyphens are added just to make the text easier to read
   - between the words that make up the Samasas or compound words
   - between words that are combined due to Sandhis.

   If the latter word in the Sandhi starts with a vowel, the
   letter after the hyphen would be the last consonant of
   the first word. Eg. भजता-मरोग should be read
   as भजतामरोग
3. The mUlam without the notes is given in a separate file.

# श्रीगीतगाङ्गेयम् सुब्रह्मण्याष्टपदी सटीक

## Kaanaadukaathaan Sri Vishvanatha Kavi

Kaanaadukaathaan Sri Vishvanatha Kavi, the author of Gita Gangeyam : A short life-sketch

Amongst the many books inspired by Gita Govindam of Jayadeva, some of the well-known ones are Rama Ashtapadi, and Shivageetimaalaa. These celebrate Rama and Sita, and Shiva and Parvati as the hero and heroine of their work, respectively. One of the recent additions to such works, is the Gita Gangeyam, which has been written in the first half of the 20th Century, CE.

The author of this work is Sri Vishvanatha Kavi, who resided in Kaanaadukaathaan and in Kundrakudi, in Tamil Nadu, India. He was born circa 1890 CE, and lived till around the age of sixty. His parents were Sri Ramasubramanya Sarma and Balambal, and they were residents of the Shivapuram Agraharam, in Srigokarnam. Srigokarnam (Tirugokarnam in Tamil) is an important temple in Pudukottai, and Goddess Parvati, known there as Brhadamba, is the tutelary deity of the Tondamaan kings who ruled from Pudukkottai in the past few centuries. The Kavi's family worshipped Lord Subrahmanya in Vaideeswaran Koil, and later in Kumaramalai (a small hill shrine near Pudukkottai) as their family deity. Later when he started residing in places around Kundrakudi, the family embraced Lord Subrahmanya of Kundrakudi as their chosen deity. In fact, he has composed Gita Gangeyam in praise of Lord Subrahmanya of Kundrakudi, which is also known as Mayuragiri. He has used synonyms for the place, such as Shikhi-shaila, Mayura-bhudhara etc. in the work.

Sri Vishvanatha Kavi completed his studies in the Vedas and became a Ghanapaathi. He was an Adhyaapaka (instructor) of the Vedas in the Vedapathashala in a village called Uyyakkondaan Siruvayal (now known as O. Siruvayal). He was also well-versed in the Valmiki Ramayana and used to conduct discourses on the Ramayana. In the Tamil month of Aippasi (Ashvayuji), he also held readings of the Tulaa Puraanam, which extols the

greatness of River Kaaveri. Apart from these, he was also a Shaabdika (grammarian), who could perform Ashtaavadhaanam in Vyaakarana (i.e. he could pay attention to and respond to eight different kinds of queries simultaneously posed to him regarding grammar). He was also devoted to his spiritual routine and would not eat until he completed his Shiva Panchaayatana Puja everyday. He had great devotion towards Mahasvami of Kanchi, as well as towards Kutraalam Mouna Svami, whose Math he would occasionally visit and spend a month or so in.

Family members of Sri Vishvanatha Kavi recall that when they later went to have Darshan, Kanchi Mahasvami told them about him, and enquired if they had learnt anything from him. It is also said that the Mahasvami directed some people with doubts in some texts to Sri Vishvanatha Kavi for clarifications.

About fifty years ago, the family (then living in Thirumeyyam) had a visitor from the French Institute of Puducherry, who wanted to collect the works of Kavi. When they searched the ancestral house in Kundrakudi, the room was seen to be invaded by termites. The few available manuscripts were taken by the visitor to the French Institute. Those works were in the Grantha script, it is said. As of now, the only work available to us is the Gita Gangeyam.

Sri Vishvanatha Kavi was married to Smt. Meenakshi. Having no children, the couple adopted his brother′s son Sri Ramanathan. Sri Ramanathan completed his Vedic studies upto Ghana, and also mastered South Indian Classical music, having taken lessons from Sri Kottaiyur Ramachandra Bhaagavatar. Sri Ramanathan′s younger son Sri Meenakshisundaram is a musician and music teacher, and his son, Sri Kundrakudi M. Balamuralikrishna is a well-known vocalist today.

The immensely famous violinist of yesteryears, Kunnakkudi R. Vaidyanathan, also belongs to this family. His father Sri Ramaswamy was another younger brother of Sri Vishvanatha Kavi.

Sri Vishvanatha Kavi spent his later years with his son′s family in Keezha-Poongudi. Till the end he continued his teaching and discourses. He was unwell only for a week before he passed away.

The Gita Gangeyam is a short Kavya, a great work filled with charming verses, that describes the sports of Lord Subrahmanya (Gangeya) and His younger consort Sri Valli.

Although modelled after Gita Govindam, it has a rare beauty of its own. It has 24 Ashtapadis ( songs with 8 stanzas) in differing rhythms and has some Shlokas before and after each Ashtapadi. These Shlokas are set in a variety of Chandas (metres) and have amazing descriptions of Nature, the heroic deeds of Subrahmanya and various nuances of the emotions of love. Many are simply sublime prayers to Him.

The book was published in 1982 by Murugan Tiruvarut Sangam of Chennai, under the guidance of musician and scholar Sri TS Vasudevan. It was made part of the Guha Bhajana Sampradaaya and published in the book of Hari-hara-guha Bhajana Sampradaaya published by Sri AK Gopalan Bhagavatar. Later it was also published by Pranatartihara Bhajana Mandali of Bengaluru and then by Dr P Siva of Hyderabad. Reconciling these four sources, this book has now been uploaded online in www.sanskritdocuments.org, under the Stotras of Subrahmanya. We hope many will read and appreciate this beautiful Kavya and musicians will add songs from it in their repertoire.

Note : Some of the lesser known words have been spelt here with double a′s to aid their correct pronunciation.

Enocoded, edited, and proofread by
Rajani Arjun Shankar rajani$_{a}rjun\ at\ yahoo.com$
Help from Sri Chandrashekhar Kalyanaraman

---

*Shri Gitagangeyam SubrahmaNya Ashtapadi with Notes*

pdf was typeset on July 9, 2023

Please send corrections to *sanskrit@cheerful.com*